स्थितौ शयीरन् उपवेशने शयने च तृणप्रस्तरमुपासीरन् प्रेतक्रियावर्ज्जम नावश्यकं न किंचित्कर्म कुर्युः
पंचमसप्तमनवमदिवसेषु सर्वेषामेव सपिंडानां बहिः स्नानं तिलोदकदानं वस्त्रप्रक्षालनं सह भोजनं चतुष्प
थश्मशानगृहेषु दीपदानमसंवाहनं च तैलाभ्यंजनं जागरादिकं प्रेताप्यायनकरं प्रथमपिंडदानवत्
द्वितीयादिषु दिवसेषु द्वितीयादिपिंडदानं तत्र विशेषः द्वितीयदिने पिंडदानवाक्ये कर्णाक्षिनासिकापूर
को द्वितीयः पिंडः द्वौ तिलतोयांजली द्वे तिलतोयपात्रे तृतीयदिने गलांसभुजवक्षः पूरकस्तृतीयः पिंडः

५ ॐ अद्यामुक गोत्र पितरमुक प्रेत इदं पानीयं ते मया॰

गंधपुष्पधूपदीपोर्णातंतु मयमुद्वहृक्षतां तू तानि पिंडे दद्यात्। ततो यावदुद्राभ्यां निःसरति तावत्पिंडामि
मुखं सिंचेत्। ततो पञ्चम्यादिनैव ॐ अद्यामुक गोत्र पितरमुक प्रेत एष सतिल तोयांजलिस्ते मया दीयते तवो
पतिष्ठतामित्येकं तिलतोयांजलिं पिंडोपरि दद्यात्। एवं पिंडसमीप एव। ॐ अद्यामुक गोत्र पितरमुक प्रेत
इदं तिलतोयपूर्णपात्रं ते मया दीयते तवोपतिष्ठतामिति एकं तिलतोयपूर्णपात्रं दद्यात्। पश्चात्सुते सर्वं दिपेत्मृत्
दीपं च तदुपरि स्नापयामृतमो माल्यं पानीयं निधाय। ॐ अद्यामुक गोत्र पितरमुक प्रेत इदं माल्यं ते मया दीयते तवोपतिष्ठतां
मिति दीपं च दद्यात्। सायंकाले गृहद्वारि प्रेतमुद्दिश्य दशरात्रं दीपं दद्यात्। तत्र रात्रौ प्रेयोपविलतायमूमौ तत्काष्ठक
समानो पितृमम पात्रद्वये जलं क्षीरं च विधाय। तत्समीपे माल्यं दीपं च धृत्वा ॐ अद्यामुकनामा राज्ञौ अमुक गोत्र पि
स्नाति तरमुकप्रेत अत्र स्नाहि। इदं पिब। इदं परिधेहि। अनेन पश्येति निवेदयेत्। आकाशाधिकरणकं दशरात्रावधि त्रेधे
तो हेशकघटधारादानं घृतजलदानं सर्वपापशान्त्यर्थं श्रम विनाशफलं प्रातः जौमरतके स्नोदये दिवामरतके न
दानो दद्येवहिर्नद्यादौ ब्राह्मणानुमत्या वीजपिंडाल पुरस्सरारुद्ध पश्चिमाः क्रमेण गृहद्वारमागत्य तत्रैव नि

कपित कालात्र

गो ५

२ पुत्रादीनशुचिशाड्वलदेशेउपविष्टान् नायमत्यंतसंवासः कस्यचित्केनचित्सह: अपि स्वेन शरीरेण किमु
तान्यैः पृथग्जनैरित्यादि महाभारतादिवाक्यानि श्रावयित्वाः पनीतशोकान्बंधुजनान्कुर्युः ततः पुत्रादिर्लगु
डमादाय मृण्मयनवभांडेन जलमानीय ग्रामाद्बहिर्देवतायतने गृहद्वारि वा शुचितीरे वा पिंडदानस्थानादेशा
न्यां दिशि अग्निं प्रज्वाल्य तंडुलप्रसृतिद्वयं प्रक्षाल्य सुशृतं स्वयं पचेत् ततो दक्षिणप्लवणे भूभागे गोमयोपलिप्ते
गौरमृत्तिकया पिंडार्थं दक्षिणप्रवणं स्थानं निर्माया चांतः कृतापसव्यो दक्षिणमुखः पातितवामजानुः पिंड ४
त्रय स्थानोपरि दक्षिणाग्रं कुशमास्तीर्य पुटकादौ जलतिलगंधपुष्पाणि प्रक्षिप्य तत्पात्रं वामहस्ते कृत्वा मोटक
कुशतिलजलान्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रेतशिरःपूरकप्रथमपिंडस्थाने अत्रावनेनिक्ष्व ते मया
दीयते तवोपतिष्ठतामिति कुशत्रयोपरि अवनेजनं दद्यात् ततस्तिलघृतमधुयुक्तं दुग्धसिक्तं तप्तमेव पिंडमा
दाय मोटकतिलजलान्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रेत एष शिरःपूरकः प्रथमः पिंडस्ते मया दीयते
तवोपतिष्ठतामिति कुशोपरि अवनेजनस्थाने पिंडं दद्यात् विहितकालेप्यकृतचूडाकरणस्य विहितकाले
ने प्यकृतोपनयनस्य नेमावेव पिंडं दद्यात् ततः प्रत्यवनेजनदानं ॐ अद्यामुकगोत्रपितरमुकप्रेतशिरःपूरकप्र
थमपिंडे प्रत्यवनेनिक्ष्व ते मया दीयते तवोपतिष्ठतामिति पिंडोपरि पूर्ववद्दद्यात् ततः प्रेतमुद्दिश्य पतूष्णीमेव २८

वामहस्तान्वारब्धदक्षिणहस्तांगुष्ठतर्जनीमध्यात्मकपितृतीर्थेनदक्षिणमुग्नकुशत्रयेणैतेतगोत्रनाममनीउद्धार्थ
म्रतंमनसाध्यायंतः कुशहस्ताः प्रेतायसतिलजलांजलिंदद्युः ॐअद्यामुकगोत्रपितरमुकप्रेत एष तिलतोयां
जलिस्ते मयादीयते तवोपतिष्ठतामिति वाक्येन ततः केकतिस्वपत्नवाममुखेनागलिखितं पापमिति संयोगमविलि
खेयुः ॥ स्त्रियाउदकदानेस्त्रीलिंगेननिर्देशः कर्तव्यः इतिविशेषः । इदंचजलदानक्रियादशमपुरुषपर्यंतंक
र्तव्या । समानग्रामवासेयावद्वासंवंधमनुस्मरेयुस्तावत्पर्यंतेयुः । स्वसुरमातामहमातुलाचार्यशिष्यसहाध्या
यिमित्रदुहितृभगिनीभागिनेययाज्ञसर्त्विजांतद्भिन्नैर्पिभिः काम्यमुदकदानेकर्त्तव्यः ॥ पतितापविद्धसर्वगामि
नीरथासंकरजातिप्रव्रजितात्मत्यागिपाषंडगर्भभर्तृहर्तृसुरापिबद्विजस्त्रीणामुदकक्रियानकर्त्तव्या पतिता
पविद्धक्रियांनकुर्यात् पतितस्यतृप्तिमिच्छन्सर्वगामिनीदत्तवेतनांदासीमाहूयशूद्रघटहस्तांब्रूयात् हेदासिगच्छ
मूल्येनतिलानानयतसत्वरं तोयपूर्णंघटंत्वंचसतिलंदक्षिणामुखी उपविश्यानुवामेनचरणेनततःक्षिपेः कीर्त्तयेः
पातकीसंज्ञांत्वंपिबेतिवदेर्मुहुः इत्युक्त्वाचैवंसादासीमृताहनिपातकीसंज्ञांकीर्त्तयित्वाऽमुकप्रेतत्वंपुनःपुनरभि
धायवामपादेनतोयपूर्णंसतिलंघटमपवर्जयेत् ततउदकदानानंतरमुत्तीर्णान्शुक्लवस्त्रांतरपरिधानाचांतान्

श्री०२

नस्य विवद्धाणस्य क्षत्रियकर्तृके वैश्यकर्तृके चानाथब्राह्मणदाहे वैश्यकर्तृकानाथसर्वस्वानाथराजदाहे पितृमेध
यज्ञफलसमफलं । ततस्तं काष्ठादिभिः तं परिक्षिप्य दग्ध्वा किंचिच्छेषं छेदयेत् । ततः प्रादेशमात्रसप्तकाष्ठिकाभिः समुद्
दक्षिणसप्तकं विधाय कुठारेलोल्मुकोपरि प्रहारसप्तकं कृत्वा । कृष्णद्वैपायनमस्तु न्यस्मिल्लुल्लोके कांकाष्ठिकामग्नौ
क्षिपेत् । अनन्तरं तत्स्थानादिवर्षं तैलगंधमाल्यादिभिरलं कृत्वा । अहरहर्नयमानो गामश्वं पुरुषं पशून्वैवस्वतो न तृप्यति सुरापाइ उँ
वदुर्मतिरिति यमगाथां गायंतो ग्रामाद्बहिः शुचिदेशे निखनेयुः । तत उदकदानादि । अथोदकदानादि ॥ ततः श्मशा
युद्ध नात् अनन्तरं शव [illegible] स्पृशः शवानुगमनकर्तारः शुचितां वामावर्तेन परावर्त्य गच्छेयुः इतश्चेतमनवलोकयमानो अहरहर्नय
सर्वे मानो गामश्वं पुरुषं पशून्वैवस्वतो न तृप्यति सुरापाइव दुर्मतिरिति यमगाथां गायंतो नदीमेव हृदं जलाशयान्तरं वा वालान के
गे कृत्य गच्छेयुः ततः श्यालकमन्यं वा याचेरन् उदककरिष्याम इति स ब्रूयात् । कुरुध्वं मा च एवं पुनरित्यशतवर्षे ते कुर्
लि ध्वमेवेतरस्मिन्निति । ततः कृतापसव्या दक्षिणामुखाः प्रकीर्णकेशाः प्रक्षालितैकवस्त्रधराः । ओं अपः नः शोशुचदघ
मिति वामहस्तानामिकया अपो दक्षिणेतानीतास्तत्र निमज्जेयुः । ततो वामहस्तानामिकयाकनिष्ठकया वप्रपो विक्षि
रवे पेयुः । अंगं च न निर्घर्षयेयुः । ततो दिवा सस्य आचम्य जले वा पाषाणपृष्ठे वा शुचितीरदेशे वा दक्षिणाग्रकुशाञ्छ्योपवी

२ श्यालकमातुलेतराश्मिमित्रपर्यंतं मनुः ४

फलेप्सितं कर्तृकानामथ ब्राह्मण कर्मकं निर्हरणक्रियासंबंधि कर्तृपदक्रमसंख्य यज्ञफलसमफलं धनंजयवाक्य

पगमपर्यंतं प्रतस्य शनैर्धारणं॥ द्विजसंस्कारोपयुक्तानि तेन काष्ठहविषां शूद्रकर्तृकानयनं निषिद्धं॥ द्विजशवस्पृ

ष्टो न स्पृशेत्॥ ततः स्नातः पुत्रादिर्दक्षिणशिरसं शवं कृत्वा गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः। कुरुक्षेत्रं च गंगां

च यमुनां च सरिद्वरां। कौशिकीं चंद्रभागां च सर्वपापप्रणाशिनीं। भद्रावकाशां गंडकीं सरयूं तमसां तथा। वैणवं च वराहं

च तीर्थं पिंडारकं तथा। पृथिव्यां यानि तीर्थानि चतुरः सागरांस्तथा। एतानि मनसा ध्यायन् जले सर्वतीर्थान्यावाह्य तेन

जलेन शवं स्नापयेत् शुचिदेशे यथाविलिखितदारुचयरचितचितायां मास्तीर्णकुशायां उत्तरशिरसो अधोमुखस्य सव्यस्य पुरुष

ततो स्य स्त्रियाश्चोत्तानदेहायाः उत्तरशिरसः स्थापनं कुर्यात्। गयादीनि च तीर्थानि ये च पुण्याः शिलोच्चयाः। कुरुक्षेत्रं च गंगां च

शि सर्वपापप्रणाशिनीं॥ भद्रावकाशां गंडकीं च सरयूं तमसां तथा। वैणवं च वराहं च तीर्थं पिंडारकं तथा। पृथिव्यां यानि ती

र्थानि चतुरः सागरांस्तथा। एतानि सर्वतीर्थानि देवाश्चाग्निमुखाः सर्वे कृतस्नानमेनं गतायुषं दहंतु इति मनसा ध्या

ऽमि त्वा अपसव्येन दक्षिणामुखो हुताशनं गृहीत्वा। कृत्वा दुष्कृतं कर्म जानता वाप्यजानता। मृत्युकालवशं प्राप्तं न

रं पंचत्वमागतं। धर्माधर्मसमायुक्तं लोभमोहसमावृतं। दहेयं सर्वगात्राणि दिव्याँल्लोकान्स गच्छतु। इति मंत्रमुदीर्य

शीघ्रं प्रदक्षिणं विधाय ज्वलदुल्मुकं शिरोदेशे दानमंत्रस्यायमहप्यर्थं त्वात्वा। स्त्रीदाहे प्यविकृत एव पठनीयः। पुं

प्र॰ दी॰ ॐ श्रीरामाय नमः ॐ गणपतये नमः अथ प्रथमक्रिया॥ ~~[illegible]~~ अत्र गंगादितीर्थे बुध्रपक्रमि
ष्यजीवितस्य त्रैवर्णिकस्य नवयज्ञोपवीतवस्त्रमाल्यादिभिः संभूषस्य स्त्रियाश्च यज्ञोपवीते तरैर्विभूषणं कुशास्त
पं॰ रणे वस्थानं भुवि त्वापादिकं गंगाजलोक्षणं गंगामृत्तिकानुलेपनं शालिग्रामशिलासन्निधापनं तुलसीसन्निधापनं विरक्ति
तुलसीपत्रदानं च कर्तव्यं तत्रफलाकांक्षितया यथाशक्ति गोभूहिरण्यादिदानं तद्द्वारा कारयितव्यं आप्लुतरपापनाशार्थं
६ दीपदानं कारयितव्यं जलतुषारयोरन्यतरेण शरीराद्योदककरणं तदसंभवे जलतुषारयोः कपापिका
ए र्यं॥ ॐ मित्येकाक्षरं ब्रह्मव्याहरन् विष्णुस्मरयोरन्यतरस्मिन्परमगतिप्राप्तिः फलमतस्तदर्थिना तत्करणं पुरुष
सूक्तादिश्रावणं अपगतप्राणस्य तस्य मुखे निक्षिप्य कांस्यमानप्र वालहिरण्यशकलस्य नासिकाद्वयक शालकं
र्णद्वयचक्षुर्द्वयनिक्षिप्य सुवर्णशकलमात्रस्य घृततैलसमायुक्तस्य देहशोधनं विधाय स्नापितस्य वर्हि
ष्मत्यां भूमौ दक्षिणशिरसा स्थापितस्य घृततैलाभ्युक्षितस्य चंदनोक्षितसर्वांगस्य वस्त्रपिहितमुखस्य
पुष्पैर्विभूषितस्य शुद्धवस्त्रोपवीतिनो गुरुणा न ज्ञोपय पुत्रादिनिर्हरणं कुर्यात् मृतद्विजं सजातीयो वृ
तिष्ठत्सु नेत्रं प्रनयेयुः न मृतं शूद्रं द्विजाः ब्राह्मणक तिकानाथ ब्राह्मणकर्मकनिर्हरणे स्वर्गलोकमाप्नोति प्रा॰
२६

त्वाविविदिषावाक्यं तदपि न त्रिदंडसंन्यासपरं एकदंडनिषेधकं एतद्वाक्यस्यैकदंडसंन्यासपरत्वं एकदंडनिषेधकत्वात् तदुक्त ॥ 10
नोवाक्येन निंदं डानां परत्वविधानादिति गौडीयग्रंथविवेकः शास्त्रात्तदेव वाक्येनापि परत्वविधानात् वस्तुतो ब्राह्मणादि ॥
ह तत्वज्ञानि पितामहप्रक्रमकृदादि विधायकादि तेन पतितेसमवर्जितो जीवन्त्येवापि तरि पार्वणविधायकं असमव
र्जितः संन्यासी अथानधिकारिणः महापातकिनस्त्वारूढपतिताः स्तेनाब्राह्मणाः मातापित्रोरन्यान्वा वीकगुरूपाध्या
यानामन्यागामिहननेहननादौ ब्रह्मचारिणां दत्वानभवति अथोदककदामाद्यन्ते अयथाविधसंन्यासेन पतिताः सं
वेदविलिप्तपद्मा कर्तारः शास्त्राविहितदेहत्यागकारिणः पाषंडाश्रितास्त्रियः गर्भभर्तृद्रुहः मद्यपा
स्त्रैवर्णिकास्त्रियः वृथासंकरजाता दीनामुदकदानादि न कर्तव्यमेतेषां वादववशिशमादिपदयोग
दिति केचित् केचिन्न दीजयाति तदुक्तं पडित्करणपावनं प्रेत प्रेत इति स्मृतः सपिंडीकरणादूर्ध्व
पूर्णमं वमादिशब्दभाक् इति वाक्यं प्रमाणयन्ति तत्रास्माकमुत्तरः पदं प्रथमं पारे छेदं ॥

अथ पतितस्यात्मस्वधर्मत्यागिनो निंदितकर्मकर्तारः गर्भभर्तृद्रुहः स्त्रियः मद्यपाः त्रैवर्णिकस्त्रि

तद्दिन एवास्थिसंचयः कर्त्तव्यः असंपूर्णे शौचांतरे तु तृतीयभागोत्तरमस्थिसंचयो गस्पर्शश्च कर्त्तव्य इति ।
अथ प्रयोगः चतुर्थदिने स्नात्वा चतुर्थपिंडं दत्वा श्राद्धदेशस्य गोमयोपलेपनं पंचगव्योपलेपनं ज्वलदंगारभ्र
मणं गोरमृत्तिका छादनानि कारयित्वा गौरसर्षपैस्तिलैश्च विकिरणं स्वयं च श्राद्धकर्त्ता पाकमारभेत ततः सिं
हेनरत्नादीपं संस्थाप्य श्राद्धदेयानि वस्तून्यासाद्य आचम्य पूर्वाभिमुख उपविश्य ॐ अपवित्रः पवित्रो वेत्या
दि पठित्वा पुंडरीकाक्षः पुनात्विति आत्मीयवस्तूनां कुशत्रयजलेनासेचनं ततः ॐ अद्यामुकगोत्रस्य पितुरमुक
प्रेतस्यास्थिसंचयनिमित्तकमेकोद्दिष्ट श्राद्धमहं करिष्य इति संकल्पं कुर्यात् ततस्त्रिर्गायत्रीं जपित्वा ॐ देवता
भ्य इति त्रिर्जपेत् ततोपसव्यं कृत्वा मोटकजलतिलान्यादाय दक्षिणामुखः सव्यजानु पातयित्वा ॐ अद्यामुकगो
त्र[illegible]पितरमुकप्रेत[illegible]अस्थिसंचयनिमित्तकैकोद्दिष्टश्राद्धे इदमासनं ते मया दीयते तवोपतिष्ठतामित्यासनं
मोटकरूपमुत्सृजेत् ततः ॐ अपहता असुरा रक्षांसि वेदिषद इति श्राद्धदेशे वामावर्त्तेन तिलान्विक्षिपेत् ततः
ॐ आयंतु न इति मंत्रं जपेत् ततः पुटके कुशपत्रद्वयं प्रादेशमात्रं दक्षिणाग्रं धृत्वा ॐ शन्नो देवीरभिष्टय इति तत्र
जलं दद्यात् ॐ तिलोसि इति तिलान्दद्यात् तूष्णीं गंधपुष्पं क्षिपेत् ततस्तदर्घपात्रं वामहस्ते कृत्वा कुशपत्रद्वयं प

च

श्रै॰ ०१९

६ रिवपणपात्रउत्तराग्रं धृत्वा तदुपरि किंचिदुदकांतरं दत्वा ॐ या दिव्या आप इति पठित्वा मोटकादीन्यादाय ॐ अद्या
मुकगोत्र पितरमुक प्रेत अस्थिसंचयनिमित्तकैकोद्दिष्टश्राद्धे एष हस्तार्घस्ते मया दीयते तवोपतिष्ठतामिति पवि
त्रोपरि अर्घजलं तदुत्सृजेत् ततः पवित्रं दुग्धसहितमर्घपात्रमासनवामपार्श्वे पवित्रस्थानमसीति अघोमुखं कृ
त्वा स्थापयेत् ततो मोटकादीन्यादाय ॐ अद्यामुकगोत्र पितरमुक प्रेतसंचयनिमित्तकैकोद्दिष्टश्राद्धे एतानि अस्थि
गंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसि ते मया दीयंते तवोपतिष्ठंतामिति गंधादीनि दद्यात् ततो जले
नासनपात्रयोरन्तरे चतुरस्रं मंडलं कृत्वा आदौ पात्रे अग्रभागं सघृतव्यंजनतिलजलं ॐ इदमन्नमेतद्भू
स्वामि पितरः स्वधानमः इति उत्सृजेत् ततो हस्ताभ्यां पात्रमन्नपूर्णमादाय मनाक्स्थित्वा पितरं ध्यायन् पु
रुषसूक्तं त्रिरावृत्तमन्नं पात्रे विधाय व्यंजनं घृतमन्नस्यानुपनीय अन्नोपरि मधु दत्वा ॐ मधुवाता इत्यादि ऋचं ॐ म
धु मधु मधु इति च जपेत् ततो वामहस्तांगुष्ठाभ्यामधोमुखाभ्यां पात्रमालभ्य ॐ पृथिवी ते पात्रमिति जपेत्
ततः इदं विष्णुरिति जपेत् ततः ॐ कृष्ण कव्यमिदं रक्षस्व मदीयमिति पठित्वा ॐ इदमन्नं ॐ इमा आपः ॐ इद ३१
माज्यं ॐ इदं हविरिति अन्नजलघृतान्यनुदक्षिणहस्तांगुष्ठं निवेश्य ॐ अपहता इति तिलानन्नोपरि वि
क्षिप्य।

प्रादेशमात्रे कुशद्वयं

वामहस्तेन पात्रमत्यजन् दक्षिणहस्तेन मोटकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रेत अस्थिसंचय 13
निमित्तकैकोद्दिष्टश्राद्धे इदमन्नं सोपकरणं ते मया दीयते तवोपतिष्ठतामित्युत्सृजेत् ततो गायत्रीं मधुवाता
इति त्र्यृचं ॐ मधु मधु मध्विति च ॐ अन्नहीनं क्रियाहीनं इति च जपेत् ततः कुशेषूपविश्य गायत्रीं मधुवाता
इत्यादिकं च जपेत् ततः ॐ कृणुष्व पाज इत्यादि रक्षोघ्नीः ॐ उदीरतामित्यादि पितृमंत्रान् पुरुषसूक्तमप्र
तिरथमन्यानि च पवित्राणि यथाशक्ति जपेत् ॐ नमस्तुभ्यमिति श्लोकं च पठेत् ततउच्छिष्टसन्निधावास्त
तकुशत्रयां भूमिं जलेन प्रोक्ष्य तिलसहितयवं जनसहितमन्नं जलेनाप्लाव्य ॐ अग्निदग्धा ये जीवा येप्रद॰ अ
ग्धाः कुले मम इत्यादिमंत्रेण कुशोपरि अन्नं विकिरेत् ततः सव्यं कृत्वाचम्य हरिं स्मृत्वापसव्यं कृत्वान्न
पात्रसमीपे पिंडदानार्थं मृन्मयवेदिकायां मध्ये प्रादेशमात्रं परिमाय वामान्वारब्धदक्षिणहस्तेन ॐ अपह॰
ता इत्यादिना तद्विलिख्य दर्भपिंजलीमुत्तरसंस्थां दक्षिणाग्रां रेखोपरि ॐ ये रूपाणि इति मंत्रेणालंगारं भ्रामयित्वांगा
रं दक्षिणतः क्षिपेत् ततो रेखोपरि छिन्नमूलान् कुशानास्तीर्य ॐ देवताभ्य इति सव्येन पुटके जलतिल
गंधपुष्पाणि क्षिप्त्वा पुटकं वामहस्ते कृत्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्र प्रेतास्थिसंचयनिमि
त्तकैकोद्दिष्टश्राद्धपिंडस्थाने अवनेनिक्ष्व ते मया दीयते तवोपतिष्ठतामिति कुशोपरि अवनेजनजलं किं

विनिर्वपेत् ततो पवे

श्रा॰ चिद्द्यात् ततः घृतमधुतिलयुक्तेनान्नेन पिंडं निर्माय घृतमध्वभिघारितं पिंडं मोटकादीनि चादाय ॐ अद्यामुक
सू॰ गोत्रपितरमुकप्रेतास्थिसंचयनिमित्तकैकोद्दिष्टश्राद्धे एष पिंडस्ते मया दीयते तवोपतिष्ठतामिति कुशोपरि वा
७ मान्वारब्धदक्षिणहस्तेन पिंडं दद्यात् ततः आस्तृतकुशमूले तु हमीकरं प्रोक्ष्य सव्यं कृत्वा चम्यापसव्यं कृत्वा ॐ
अत्र पितर्मादयस्वेत्यादि मंत्रं पठित्वा उत्तराभिमुखीभूय श्वासनिरोधं कुर्वन् पितरं भासुरमूर्तिं ध्यायन् अमीम
ॐ दंत पिता मादयस्वेत्यादिना ऊहेन जपेत् ततः पूर्वावशिष्टजलमवनेजनपात्रं वामहस्ते कृत्वा मोटकादीन्यादा
य ॐ अद्यामुकगोत्रपितरमुकप्रेतास्थिसंचयनिमित्तकैकोद्दिष्टश्राद्धपिंडे प्रत्यवनेनिक्ष्व ते मया दीयते तवो
पतिष्ठतामिति प्रत्यवनेजनं दद्यात् ततो नीवीं विस्रंस्य सव्यं कृत्वाचम्य हरिं स्मृत्वा वामहस्तेन सूत्रमादाय
कराभ्यां तद्गृहीत्वा एतद्वः पितरो वासः इति सूत्रं पिंडोपरि धृत्वा ॐ अद्यामुकगोत्रपितरमुकप्रेतास्थिसंचयनि
मित्तकैकोद्दिष्टश्राद्धपिंडे एतद्वासस्ते मया दीयते तवोपतिष्ठतामिति मोटकादि [illegible] नं दद्यात् ततः पिंडं गंधपुष्प
धूपदीपतांबूलैरभ्यर्च्य पिंडशेषान्नं पिंडसमीपे विकिरेत् ॐ शिवा आपः संतु ॐ सौमनस्यमस्तु ॐ अक्षतं ७
चारिष्टमस्तु इत्यन्नपात्रे जलादीन् दत्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्यास्थि
संचयनिमित्तकैकोद्दिष्टश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठतामित्युत्सृजेत् ततः सव्यं कृत्वा दक्षिणां दिशं प ३२

श्यपन् ॐअघोरःपितास्त्वितिपिंडोपरिपूर्वाग्रांजलधारांदद्यात् ततःपूर्वाभिमुखः ॐगोत्रंनोवर्द्धतां ॐदाता॰
रोभिवर्द्धतांवेदाःसंततिरित्यादिनाआशिषोयाचेत् ततोपसव्यंकृत्वापिंडोपरिसपवित्रान्कुशानास्तीर्यपुट
कादिजलेन ॐऊर्ज्जंवहंतीरित्यादिपठित्वाकुशोपरिदक्षिणाग्रांजलधारांदद्यात् ततःपिंडमाघ्रायोत्थाप्यये
त् छिन्नमूलकुशानंगारंचाग्नौदहेत् अर्घपात्रमुत्तानीकृत्वामोटकादीनिदक्षिणाद्रव्यंचादाय ॐअद्यामुक
गोत्रस्यपितुरमुकप्रेतस्यकृतैतदस्थिसंचयनिमित्तकैकोद्दिष्टश्राद्धप्रतिष्ठार्थमिदंरजतंचंद्रदैवतंयथा॰
नामगोत्रायदक्षिणांदातुमहमुत्सृजे इतिदक्षिणांदद्यात् ततःसव्येन त्रिर्देवताभ्य इतिजपित्वापसव्यंकृ
त्वादीपंनिर्वाप्यहस्तौपादौप्रक्षाल्यपसव्येनाचम्य ॐप्रमादादितिपठित्वाविष्णुंस्मरेत् आच्छाद्यवस्त्रंब्राह्
णायप्रतिपादयेत्जलेवाक्षिपेत् ततःपुत्रादिर्ज्ञातिबंधुमिलितःस्नातःसुधौतवस्त्रैः नानाविधफलमूल॰
भक्ष्यपानादिभिःस्वज्ञात्यनुरूपैरष्टौपात्राणिपूरयित्वागंधपुष्पधूपदीपादिकंचगृहीत्वाश्मशानसमीप॰
मागत्यतत्रान्वितैःकैश्चिदर्घैःकैश्चित्पुष्पैःकैश्चिद्भोजनैःकैश्चिद्दीपैःकैश्चिन्माल्यैःकैश्चित्पानीयैःकैश्चि
द् दत्तैःसर्वंनिवेदयेत्कैश्चिन्निरहंकारयुक्तैःसमंततश्चतुर्षुअन्नादिपूर्णपात्रेषुनिवेदितेषुप्रथमंचितायां
उत्तरद्वारसमीपेउपविश्य ॐनमःक्रव्यादमुखेभ्योदेवेभ्य इतिसर्वदा येस्मिन्श्मशानेदेवाःस्युर्भगवंतःसना

अं॰ ततः तेस्मत्सकाशाद्गृह्णंतु बलिमष्टांगमक्षयं प्रेतस्यास्य शुभांल्लोकान्प्रयच्छंतु च शाश्वतान् अस्माकमायुरा
ष्टी॰ रोग्यं सुखं च ददतां वरं इति पठित्वा ॐ एषोष्टांगबलिः शंकरादिदेवताभ्यो नमः इत्येकं बलिं दद्यात् एवं प्रदक्षि
८ णक्रमेणापरं बलित्रयं त्रिषु द्वारेषु दत्वा तान्बलीन् क्षीरेणाभ्युक्ष्य शंकरादिदेवताः स्वीयस्वीयस्थानं गच्छंतु
इति देवता विसृज्य क्षीरेण वाग्यतः चितास्थीन्यभ्युक्ष्य प्रथमं शिरोस्थीनि शमीपलाशशाखाभ्यामुद्धृ
त्योद्धृत्याज्येनाभ्युक्ष्य गंधवारिणा सिक्त्वा कृतापसव्यो दक्षिणांगुष्ठकनिष्ठाभ्यां गृहीत्वा ततोन्यान्यपि
अस्थीनि गृहीत्वा पंचगव्येन सुगंधिवारिणा सिक्त्वा पलाशपुटे निक्षिप्य क्षौमवस्त्रेण संवेष्ट्य मृण्मये नूत
नभांडे साच्छादने निदध्यात् तद्भांडमरण्ये वृक्षमूले वा पंशैवालयुतगर्ते वा निभृतं धापयेत् चिताभस्मादि
तोये निक्षिपेत् गोमयांबुभिः सिक्ता भूमिं शुद्धिं विधाय पूर्ववच्चतुर्दिक्षु शंकरादिदेवताभ्यो बलीन् घृतादियुक्तान् क
नमः क्रव्यादमुखेभ्य इत्यादिमंत्रेण दद्यात् तान्विसृजेत बल्यन्नमंत्येभ्यो दद्यात् अंभसि वा क्षिपेत् ततस्त्रि
तां भूमेराच्छादनार्थं वृक्षः पुष्करकः पट्टको वा कारयितव्यः पुष्करः इष्टिकानिर्मितदेवकुमठकाकारं गृहं ततः ति
सचैलो बंधुभिः सह स्नायात् अन्यः कश्चित्पुत्रपौत्रसहोदरादिर्गंगातीरं नीत्वा स्नात्वा तान्यस्थीनि पंचगव्येन प्रति
प्रोक्ष्य हिरण्यमध्वाज्यतिलैः संयोज्य मृत्पिंडपुटे निधाय दक्षिणां दिशं पश्यन् ॐ नमोस्तु धर्मायेति वदन् ज ३३

लं प्रविश्य प्रेतगतस्वर्गकामो दक्षिणामुखः स मे प्रीतः इत्युक्त्वा गंगांभसि निक्षिपेत् ततः स्नात्वोत्थाय सूर्यं प-
श्येत् तत आचम्य ॐ अद्य कृतैतदस्थिप्रक्षेपप्रतिष्ठार्थं इदं हिरण्यमग्निदैवतं यथानामगोत्राय ब्राह्मणाय
दक्षिणां दातुमहमुत्सृजे इति दक्षिणां दद्यात् एवं कृते प्रेतपुरस्थितस्य स्वर्गगतिः स्यात् हुमहेन्द्रतुल्या यावदस्थि
मनुष्यस्य गंगातोयेषु मज्जति तावद्वर्षसहस्राणि स्वर्गलोके महीयते गंगातोयेषु यस्यास्थि प्लवते शुभकर्मणः
न तस्य पुनरावृत्तिर्ब्रह्मलोकात्कथंचन गौडाः दशाहाभ्यंतरे यस्य गंगातोये स्थि मज्जति गंगायां मरणे याद्दृ
क्तादृग्फलमवाप्नुयात् ब्रह्मपुराणे मातुःकुलं पितृकुलं वर्जयित्वा नराधमः अस्थीन्यन्यकुलोत्थानि नी-
त्वा चांद्रायणं चरेत् एवं च मातृकुलं न्यकुलोत्थस्याप्यस्थ्नो नयने धर्मबुध्या दोषाभावः अथाचारान्निरग्ने
रप्यस्थिपर्णनरदाहः दाह्यशरीरालाभे तदस्थिघृतेनाभ्युद्य वस्त्रेणाच्छाद्य दहेत् अस्थ्नामप्यलाभे षष्ट्यधि-
क पलाशपत्रशतत्रयेण पुरुषाकृतिं विन्यस्य ॐ असौ स्वर्गाय लोकाय स्वाहेति दहेत् उदकधारां च दद्यात् घृतेष्टिः
तद्विन्यासप्रकारस्तु शिरस्य शीत्यर्द्धं दद्यात् ग्रीवायां तु दशैव तु बाह्वोश्चैव शतं दद्यादंगुलीषु तथा दश उरसि त्रिके ण
त्रिंशतं तथा दद्याद्विंशतिं जठरे तथा अष्टार्धं शिश्ने दद्यात् द्वादशार्द्धं वृषणयोः ऊर्वोश्चैव शतं दद्यात् त्रिंशतिं घृटशिति
अग्निहोत्र २ जानुजंघयोः पादांगुलीषु दश दद्यादेतत्पत्रविकल्पनं अनाहिताग्निदेहस्तु दाह्योगृह्याग्निना द्विजैः तद पतेति देह
लाभे पलाशोत्थैः पत्रैः कार्यः पुमानिति शतैस्त्रिभिस्तथा षष्ट्या शरव्रातैर्विधानतः वेष्टितव्यस्तथायन्नात्

ह्यदशाहमानम्निस्तत्र उपदनसंशपद्धति   २ मरणं वंतानां व्रातं मरः विद्यते ये वा तैः पत्रैः

श्रा॰ वि॰ ९ कृष्णसारस्यचर्मणा ऊर्णासूत्रेणवध्वापुत्तलेन्यस्तथायवैः स्वपिष्टैर्जलमिश्रैश्च प्रदग्धव्यस्तथाग्निना
असौस्वर्गायलोकायस्वाहेत्युक्त्वास्ववांधवैः एवंपर्णनरंदग्ध्वात्रिरात्रमशुचिर्भवेत् तुल्यन्यायतया
स्थिदाहेपित्रिरात्राशौचं एवंकृतेमृतभ्रांत्यायद्यागच्छेत्सुमान्कथंचित् कुर्यादस्यायुष्मतीष्टिंपुनरादाय धा
पावकं सांग्रेरियमिष्टिः निरग्नेस्तुशांतिस्वस्त्ययनमन्यदिति अथाशौचांतदिनकृत्यं तत्राशौचांतपूर्व
त दिनेसर्वंबांरजकद्वारावस्त्रशुद्धिंकारयित्वा अथाशौचांतदिवसेगृहशुद्धिंकृत्वामृण्मयपाकभांडानि
त्यक्त्वादशमंपिंडंदत्त्वास्नात्वावहिरुदकांतेकेशलोमनखान्वाप्ययोग्यंवापयित्वातिलतैलेनात्नात्वागौरस
द्वैन र्षपकल्केनशिरस्त्रोन्मज्ज्यस्नात्वाप्रेतस्पृष्टवासांस्यंतेभ्यस्त्रिभ्योदत्त्वाचम्यवाग्यतोवासोयुगमहतंनवं सदर्पक
शुक्लंपुरातनंवाशुक्लमवर्णंपरिधाय अश्माग्निं एगांसुवर्णंगोरोचनंदधिदूर्वासितसर्षपं ब्राह्मणाग्निंच्छत्रंयो
निं वपत्र वाहनायुधंवैश्यः प्रतोदप्रग्रहौ शूद्रोयष्टिंसंस्पृश्यमंगलानिसंकीर्त्य ब्राह्मणान्स्वस्तिवाचयित्वागृहंप्रविशेत्
अत्रदिनेब्राह्मणाः पंचगव्यपानंकुर्वंतीतिसमाचारः इतिश्राद्धविवेकेप्रथमक्रियापरिच्छेदो द्वितीयः २ अथैका
दशाहश्राद्धनिमंत्रणादि तत्रादौशौचांतदिनेनिरामिषमेकवारंभुक्त्वारात्रौसर्वभुक्तेजनेगृहेविप्रनिवेशनंगत्वा
गोमयोपलिप्तदक्षिणाप्रवणभूमौब्राह्मणमुदङ्मुखमुपवेश्यकृतापसव्योदक्षिणाभिमुखोनामितवामजानुः ९
ॐगतोसिदिव्यलोकंत्वंकृतांतविहितात्पथः मनसावायुभूतेनविप्रेत्वाहंनियोजये पूजयिष्यामिभोगेनइति ३५

प्रेतोद्देशेन पठित्वा पुष्पचंदनतांबूलानि ब्राह्मणाय दत्वा ब्राह्मणजानुं स्पृष्ट्वा ॐ अस्यां रात्रौ अमुकगोत्रस्य पि
तुरमुकप्रेतस्य स्वर्ग्याद्यश्राद्धकरणाय भवंतं ब्राह्मणमहमामंत्रये इत्यामंत्रयेत् आमंत्रितोस्मीति ब्राह्मणेनोक्ते
ॐ अक्रोधेन शौचपरेण सततं ब्रह्मवादिना भवितव्यं भवता च मया च श्राद्धकारिणा ॐ सर्वायासविनिर्मुक्तेन
कामक्रोधविवर्जितेन भवितव्यं भवता नः स्वस्तने श्राद्धकर्मणि इति ब्राह्मणमुद्दिश्य पठेत् यद्यविघ्नेन रजनीया
स्यति नदा सर्वमेतत्करिष्यामीति तेनोक्ते ॐ इदं ते पाद्यमिति पाद्यं दत्वा द्विजं नमस्कृत्य प्रेतहितमुद्दिश्य तिलतैले
ना जानु विप्रपादौ प्रक्षालयेत् अत्र स्त्रियाश्च उद्देश्यत्वे ॐ गतासीत्यविकृतमेव पठनीयमात्मत्वेनोद्देश्यत्वात् अ
थैकदशाहे वहिर्नदीतीरादौ प्रातः श्वेतवस्त्रयुगेन स्नात्वा सूर्योदये पात्रब्राह्मणस्य श्मश्रुकर्म नखछेदनं च
कारयेत् ताम्रपात्रेण तैलोद्वर्तने स्नानोपकरणं च दद्यात् स्वयं स्नात्वा कृतनित्यक्रियो नदीतीरे गृहे वा श्राद्धभू
मिं परिकल्प्य पंचगव्येनोपलिप्य ज्वलदंगारैः संशोध्य गौरमृत्तिकया छाद्य तिलैः सर्षपैश्च विकरेत् गोमयोप
लिप्ता वृतपाकस्थाने तिलान्विकीर्य परितः छागान्बंधयित्वा तत्र सपिंडद्वारा स्वयं वा नूतनमृण्मयभांडैः पा
कमारभेत् तत आचांतः पूर्वाभिमुखः उदङ्मुखाय शय्यां दद्यात् ततः ॐ सोपकरणशय्यायै नमः ॐ ब्राह्मणाय
नमः इति देय ब्राह्मणौ त्रिः संपूज्य ॐ इमां सोपकरणां शय्यां ते ददानीति द्विजकरे जलदानं वारिणा शय्यामि

सेचनं ततः कुशत्रयजलान्यादाय ओं अद्याशौचान्तद्वितीयेऽह्नि अमुकगोत्रस्य पितुरमुकप्रेतस्य स्वर्गप्राप्तिकाम इमां
अं॰ सोपकरणशय्यां विष्णुदैवताममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति दद्यात् ओं स्वस्ति इति प्रतिव
टी॰ चनं ततः कुशत्रयतिलजलानि दक्षिणाद्रव्यं चादाय ओं अद्य कृतैतत्सोपकरणशय्यादानप्रतिष्ठार्थमिदं हिरण्यमग्निदै त
१० वतं अमुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति दद्यात् ततः प्रतिगृहीता ओं स्वस्तीति उक्त्वा सो
पकरणां शय्यां स्पृशेत् ततआचम्य ओं फलवस्त्रसमन्वितकांचनपुरुषाय नमः ओं ब्राह्मणाय नमः इति देयब्राह्मणे त्रिः
संपूज्य ओं इमं फलवस्त्रसमन्वितं कांचनपुरुषं ओं ब्राह्मणाय ददानीति द्विजकरे जलदानं वारिणा देयद्रव्यसेचनं कु
शत्रयादीन्यादाय ओं अद्याशौचान्तद्वितीयेऽह्नि अमुकगोत्रस्य पितुरमुकप्रेतस्य स्वर्गप्राप्तिकाम इदं फलवस्त्रसमन्वि
तकांचनपुरुषं विष्णुदैवतं अमुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति दद्यात् ओं स्वस्तीति प्रतिवचनं
त ततो दक्षिणाद्रव्यादिकमादाय ओं अद्य कृतैतत्फलवस्त्रसमन्वितकांचनपुरुषदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवत
ममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति दद्यात् प्रतिगृहीता स्वस्तीत्युक्त्वा कांचनपुरुषं स्पृ
शेत् ततआचम्य कुशत्रयतिलजलान्यादाय ओं अद्याशौचान्तद्वितीयेऽह्नि अमुकगोत्रस्य पितुरमुकप्रेतस्य स्वर्गप्रा
प्तिकामो द्विजदंपती अहं पूजयिष्ये इति संकल्प्य द्विजदंपती पूजयेत् तत्र क्रमः एषोऽर्घः ओं द्विजदंपतीभ्यां नमः इदमनुलेपनं ३५

21

ॐद्विजदंपतीभ्यांनमः इत्युभयोःपादयोस्त्रिःपूजांकुर्यात् ततःपुष्पजलाभ्यामेतानिधूपदीपतांबूलनैवेद्यसिंदूरवि
भूषणवासांसि ॐद्विजदंपतीभ्यांनमः इतिदद्यात् तौनमस्कुर्यात् एतच्च द्विजदंपतीपूजनंप्रधानत्वाद्वृषोत्सर्गाकर
णेपिकर्तव्यंशय्यादानवदिति अथवृषोत्सर्गप्रयोगः ततः वृषोत्सर्गसंभृतिंविविक्तेनिर्जनवनगोमध्यप्रागुदकप्रव
णदेशंनयेत् ततआचांतःपूर्वाभिमुखउपविश्यकुशत्रयतिलजलान्यादाय ॐअद्याशौचांतद्वितीयेह्नि अमुकगो
त्रस्यपितुरमुकप्रेतस्यमोक्षकामः सोपकरणवत्सतरीचतुष्टयसहितवृषोत्सर्गमहंकरिष्ये इतिसंकल्पं नीलवृष कुर्यात्
प्राप्तौनीलपदप्रक्षेपःकर्तव्यः कार्तिक्यांवृषोत्सर्गे ॐअद्यकार्तिक्यांतिथौ अमुकगोत्रस्यपितुरमुकशर्मणोमोक्षका
त मोःपूर्वान्दत्वा सोपकरणवत्सतरीचतुष्टयसहितवृषोत्सर्गमहंकरिष्ये इतिसंकल्पविशेषः वत्सतर्य्येकपक्षे चतु
ष्टयपदस्थाने एकपदप्रक्षेपः ततउत्तराभिमुखंब्राह्मणमुपवेश्य ॐअद्यामुकगोत्रस्यपितुरमुकप्रेतस्यकर्तव्यवृ
षोत्सर्गांगभूतहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मकर्तुममुकगोत्रममुकशर्माणंब्राह्मणमेभिःपुष्पचंद
नतांबूलवस्त्रयुगहेमालंकरणैर्ब्रह्मत्वेनत्वामहंवृणे इतिब्राह्मणंवृणुयात् ॐवृतोस्मीतिप्रतिवचनं ॐयथाविहि
तंकर्मकुरु इतियजमानस्तमुद्दिश्यवदेत् ॐकरवाणीतिप्रतिवचनं ततः ॐअद्यामुकगोत्रस्यपितुरमुकप्रेतस्यक
र्तव्यवृषोत्सर्गांगभूतहोमकर्मकर्तुममुकगोत्रममुकशर्माणंब्राह्मणमेभिःपुष्पचंदनतांबूलहेमालंकरणवासोभिर्हो

तेषांमग्नेर्नाकुशानांबर्हिषउद्यते

तत्वेनत्वामहंवृणे इत्याचार्य्यंवृणुयात् ओंवृतोस्मीतिप्रतिवचनं ओंयथाविहितंकर्मकुर्विति यजमानस्तमुद्दिश्य वदेत् ओंक
अं॰ रवाणीति तत्प्रतिवचनं ततोहोताचांतोगोमयोपलिप्तवेदिकायां प्राङ्मुखउपविश्य पुरतः कुशैर्हस्तमात्रं चतुरस्रं परि
टी॰ समुह्यकुशानैशान्यांक्षिप्त्वागोमयोदकेनोपलिप्यमध्ये प्रादेशमात्रमुत्तरोत्तरक्रमेणस्रुवमूलेनत्रिरुल्लिख्यउल्लेखन
११ मृ॰ क्रमेणदक्षिणांगुष्ठानामिकाभ्यांसंगताभ्यामुद्धृत्यैशान्यांतत्क्षिप्त्वातंदेशंजलेनाभ्युक्ष्यतत्रदक्षिणहस्तस्थकांस्येन
तूष्णीमग्निंस्थापयेत् अग्नेर्दक्षिणतः परिस्तरणभूमिमतिक्रम्य शुद्धमासनमुपकल्प्य तत्र प्रागग्रकुशैरास्तरणं विधा
ग्र यब्रह्माणमग्नेर्वायव्यांप्रदक्षिणमानीयकल्पितासनेबर्हिर्हस्तस्तमुदङ्मुखमुपवेशयेत् ततोग्नेरुत्तरतःस्तरणभूमिम
तिक्रम्यकुशत्रयमास्तीर्य्य तत्रसांतरालमत्पात्रस्य बर्हिषाच्छादितंसर्वकार्य्यार्थमुदकंक्षीरंचब्रह्मणोमुखमवलो
क्यनिदध्यात् ततउपमूललूनबर्हिषांमुष्टिंचतुर्थभागेनाग्नेयादीशानांतं प्राच्यांब्रह्मणोग्निपर्य्यंतंदक्षिणस्यांनैरृ
त्याद्वायव्यांतंपश्चिमायामग्नितः प्रणीतापर्य्यंतंउत्तरस्यामास्तरणंकुर्यात् ततआसादनमुपयोक्ष्यमाणानामग्नेरुत्तर
तः प्रणीतापश्चिमे प्राक्संस्थमुदक्संस्थंवा तद्यथापवित्रच्छेदनार्थंकुशत्रयं पवित्रार्थमनंतर्गर्भिणंसाग्रंकुशपत्र
द्वयंप्रोक्षणार्थममृतपात्रं आज्यार्थंताम्रस्थालीं पायसार्थंमृत्तिकास्थालीं स्रुवसंमार्जनार्थंकुशत्रयंउपग्रहार्थंवेणी
रूपकुशत्रयंप्रादेशमितपलाशसमिधत्रयंस्रुक्स्रुवआज्यंतंडुलाः दुग्धंएवमासाद्यतदुत्तरतः पोक्षंसिद्धमेवपिष्टमयं
चरुंब्रह्मदक्षिणार्थंपूर्णपात्रंहोतृदक्षिणार्थंवस्त्रयुगंसुवर्णंकांस्यान्युपकल्पयेत् ततोवाग्यतआसादितकुशपत्रद्व

तल्लता
अंतर्गर्भरहितं
कूर्चदेवताकं
सूक्ष्मतिः

यमादायपवित्रच्छेदनकुशैः प्रादेशमात्रं समायच्छित्वा तानपास्य पवित्राभ्यां प्रणीतोदकं चोत्पूय सपवित्रकरेण प्रणी
हस्त तोदकं त्रिः प्रोक्षण्यां निधाय उदग्रपवित्रे व्यस्तयोरंगुष्ठानामिकाग्राभ्यामतयोराधाय तन्मध्येन प्रोक्षण्युदकं भूमौ ॰
त्रिः क्षिप्त्वा पवित्रे प्रोक्षण्यां निधाय तत्पात्रं दक्षिणहस्तेनादाय वामे निधाय दक्षिणहस्तानामिकांगुष्ठाभ्यां तज्जलं किं
चिदूर्ध्वमुत्क्षिप्य प्रणीताजलेन प्रोक्षणीमभिषिंच्य तज्जलेन यथासादितं द्रव्यं प्रत्येकं सकृत्प्रोक्ष्य पवित्रशेषजलस
प्रोक्षणी हितपात्रं प्रणीताग्न्योरंतरे निधायाज्यस्थाल्यामाज्यं निरूप्य चरुस्थाल्यां तंडुलान्निक्षिप्य प्रणीतोदकेन तांस्त्रिः प्र ×
क्षाल्य तत्र प्रणीतोदकं दुग्धं च प्रक्षिप्य स्वयं चरुं ब्रह्मणा चाज्यं गृहीत्वा प्रदक्षिणीकृत्याग्निं पूर्वेणानीत्वा दक्षिणतश्रा ॰
ज्यमुत्तरतः पायसं चरुं पचनार्थं युगपदग्नौ निधायोल्मुकं सह विष्काग्नेः प्रदक्षिणं भ्रामयित्वा तत्रैव क्षिप्त्वा स्रुवस्य प्राग ॰
ग्रस्य प्राङ्मुखस्याग्नौ प्रतपनमुत्तानस्य संमार्जनकुशैरंतरतोग्रान्मूलपर्यंतं मध्ये मध्यत एवं मूलैर्बाह्यतो मूलादग्र प
र्यंतं संमार्जनं प्रणीताद्भिरभ्युक्षणं पुनः प्रतपनं आस्तृतबर्हिषि स्वपुरतः प्रागग्रस्य स्थापनं विधाय पाके वृत्ते स्वयमाज्य
३आपि मुद्वास्याग्निपश्चिमेन नीत्वा प्रणीतोत्तरतः प्रथमं निधाय चरुं तथैवोद्वास्याज्यपश्चिमेन नीत्वाज्योत्तरतो निधाय स्वपुर
३ तः स्रुवोत्तरे आज्यं तदुत्तरतश्चरुं निधाय प्रोक्षणीतः पवित्रे समानीय आज्ये प्रोक्षणीवदुत्पवनं पवित्रे प्रोक्षण्यां निधा
य आज्यमवेक्ष्य सत्यपद्रव्ये तन्निरस्य प्रोक्षण्युत्पवनं निधाय पायसचरोरुत्तरतः पूर्वसिद्धपिष्टकचरुं निधाय होमस
माप्तिपर्यंतमुपग्रहार्थं कुशैर्वामहस्ते उपग्रहं विधाय प्रजापतिं चिंतयन्तुष्णीं न प्रागग्रघृताक्तसमित्त्रयं प्रक्षिप्योपवि

पपसचं भ्र॰ग्र॰पा॰शि॰

मो॰ते॰ने॰पर्या॰ मो॰ १

होम स्वाहान्ते इदमग्नये इति त्यागः

अग्रं॰ सी॰ १२

उपप्रोक्ष्य त्रिः सहविष्कमग्निं प्रणीताब्रह्मसहितं पर्युक्ष्य पवित्रे प्रणीतासु निधाय प्रोक्षणीपात्रं स्वस्थाने निदध्या
त् ततो ब्रह्मणा कुशैर्बर्हिषान्वारब्धो दक्षिणं जानुं नमयित्वा संस्रवं विनैवाज्येन जुहुयात् स्वाहान्ते होमः इदमग्नये
इति त्यागः ओं इह रतिः स्वाहा इदमग्नये ओं इह रमध्वं स्वाहा इदमग्नये ओं इह धृतिः स्वाहा इदमग्नये ओं इह स्वधृतिः
स्वाहा इदमग्नये ओं उपसृजं धरुणं मात्रे धरुणो मातरं धयन् स्वाहा इदमग्नये ओं रायस्पोषमस्मासु दीधरत् स्वाहा
इदमग्नये ततः प्राक् स्रुजुमग्नेर्दक्षिणभागे मनसा ओं प्रजापतये स्वाहा इदं प्रजापतये अग्नेरुत्तरभागे स्रुजु प्राक् ओं इन्द्रा
य स्वाहा इदमिन्द्राय ततउत्तरपूर्वार्द्धे ओं अग्नये स्वाहा इदमग्नये दक्षिणपूर्वार्द्धे ओं सोमाय स्वाहा इदं सोमाय इत्याघा
रावाज्यभागौ ससंस्रवं हित्वा पायसं पिष्टमेकमादाय समिद्धतमे संस्रवं विनैव पायसेन जुहुयात् ओं अग्नये स्वा
हा इदमग्नये ओं रुद्राय स्वाहा इदं रुद्राय ओं शर्वाय स्वाहा इदं शर्वाय ओं पशुपतये स्वाहा इदं पशुपतये ओं उग्राय स्वा
हा इदमुग्राय ओं अशनये स्वाहा इदमशनये ओं भवाय स्वाहा इदं भवाय ओं महादेवाय स्वाहा इदं महादेवाय ओं ईशा
नाय स्वाहा इदमीशानाय इति हुत्वा पिष्टकेन ओं पूषा गा अन्वेतु नः पूषा रक्षत्वर्वतः पूषा वाजं सनोतु नः स्वाहा इदं
पूष्णे ततः पायसपिष्टकाभ्यामुत्तरार्द्धावदानभूताभ्यां अग्नये स्विष्टकृते स्वाहा इदमग्नये स्विष्टकृते अग्नेर्मध्य
भागे चाज्येन ओं भूः स्वाहा इदं भूः ओं भुवः स्वाहा इदं भुवः ओं स्वः स्वाहा इदं स्वः ओं तन्नो अग्ने वरुणस्य विद्वान् देव
स्य हेडो अवयासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् स्वाहा इदमग्नीवरुणाभ्यां ओं स ३२

त्वन्नोअग्नेस्वमोभवोतीनेदिष्ठोअस्याउषसोव्युष्टौअवयक्ष्वनोवरुणंरराणोवीहिमृडीकंसुहवोनएधिस्वाहाइद
मग्नीवरुणाभ्यां ओंअयाश्चाग्नेस्यनभिशस्तिपाश्चसत्यमित्त्वमयाअसिअयानोयज्ञंवहास्ययानोधेहिभेषजं
स्वाहाइदमग्नये ओंयेतेशतंवरुणयेसहस्रंयज्ञियाःपाशावितता महान्तः तेभिर्नोअद्यसवितोतविष्णुर्विश्वेमुञ्चन्तुमरु
तःस्वर्काःस्वाहा इदंवरुणायसवित्रेविष्णवेविश्वेभ्योदेवेभ्योमरुद्भ्यःस्वर्केभ्यः ओंउदुत्तमंवरुणपाशमस्मदवाधमं
विमध्यमंश्रथाय अथावयमादित्यव्रतेतवानागसोअदितयेस्यामस्वाहाइदंवरुणाय ओंप्रजापतयेस्वाहाइदंप्र
जापतयेइतिमनसा एवंहुत्वासंस्रवप्राशनमाचमनंचकृत्वापवित्राभ्यांशिरःप्रभृतिसंमार्जनं ओंसुमित्रियानआपओष
धयःसन्त्वितिमन्त्रेण ओंदुर्मित्रियास्तस्मैसन्तुयोस्मान्द्वेष्टियंचवयंद्विष्मइतिमन्त्रेणप्रणीतोदकमैशान्यांनिनयेत त
तःफलपुष्पान्वितघृतेन ओंमूर्धानंदिवोअरतिंपृथिव्यावैश्वानरमृतआजातमग्निंकविंसम्राजमतिथिंजनानामास
न्नापात्रंजनयन्तुदेवाःस्वाहाइदमग्नये इतियजमानसहितोहोतापूर्णाहुतिंकुर्यात् ततःस्तरणक्रमेणबर्हिरुत्थाप्य
आज्येनाभिघार्य ओंदेवागातुविदोगातुंवित्त्वागातुमितमनसस्पतइमंदेवयज्ञंस्वाहावातेधाःस्वाहाइदमग्नये इ
तिबर्हिहोमंकुर्यात् ततोयजमानःकुशत्रयतिलजलान्यादाय ओंअद्यकृतैतद्धोमकर्मणिकृताकृतावेक्षणरूपब्रह्म
कर्मप्रतिष्ठार्थमिदंपूर्णपात्रंप्रजापतिदैवतंअमुकगोत्रायामुकशर्मणेब्राह्मणायदक्षिणांतुभ्यमहंसंप्रददेइतिब्रह्म
णेदक्षिणांदद्यात् स्वस्तीतिप्रतिवचनंयजमानेनतत्परितोषार्थंकिंचिद्दातव्यं ततोवस्त्रयुगसुवर्णकांस्यान्युपनीयकु।

२ सव्याग्निमपाददक्षिणपार्श्वे चक्रं ए पश्चिमपादे वामपार्श्वे शूलेन न ...

त्रै॰ दी शानादाय ॐ अद्य कर्त्तव्यवृषोत्सर्गांगभूतकृते तद्धोमकर्मप्रतिष्ठार्थमेतानि वस्त्रयुगस्वर्णकांस्यानि बृहस्पतिवह्निचन्द्र
स्त्री॰ दैवतानि अमुकगोत्रायामुकशर्मणे ब्राह्मणाय होत्रे दक्षिणां तुभ्यमहं संप्रददे इति होत्रे दक्षिणां दद्यात् ततो रुद्राध्यायं
१३ त जपित्वा कर्मकारमाहूय वृषभं कयेत् ततो वत्सरी चतुष्टयसहितं वृषभं कुशजलेन स्नपयेत् तत्र क...मंत्राः ॐ हिरण्य
वर्णाः शुचयः पावका यासु जातः कश्यपो यास्विंद्रः या अग्निं गर्भं दधिरे सुवर्णास्तान आपः शंस्योना भवंतु ॐ यासां राजा
वरुणो याति मध्ये सत्यानृते अवपश्यन् जनानां या अग्निं गर्भं दधिरे सुवर्णास्तान आपः शंस्योना भवंतु ॐ यासां देवा
दिवि कृण्वंति भक्ष्यं या अंतरिक्षे बहुधा भवंति या अग्निं गर्भं दधिरे सुवर्णास्तान आपः शंस्योना भवंतु ॐ शिवेन मा चक्षुषा
पश्यतापः शिवया तन्वोप स्पृशत त्वचं मे घृतश्चुतः शुचयो याः पावकास्तान आपः शंस्योना भवंतु ॐ शन्नो देवीरभिष्ट
वं य आपो भवंतु पीतये शंय्योरभिस्रवंतु नः इति ततो लोहघंटिकानूपुरकनकपट्टिकादिभिः पंचाप्यलंकृत्य सावित्रीमघ
मर्षणं रुद्रान् पुरुषसूक्तं यद्देवा देवहेडनमित्यादि सूक्तं यं कूष्मांडीश्च जपेत् ततो वृषभस्य दक्षिणकर्णे ॐ पिता वत्सानां
पतिरघ्न्यानामथो पिता महतां गर्गराणां वत्सो जरायु प्रतिधुक् पीयूष आमिक्षा घृतं तद्वस्य रेतः ॐ वृषो हि भगवान् धर्म
श्चतुष्पादः प्रकीर्त्तितः वृणोमि तमहं भक्त्या स मां रक्षतु सर्वतः इति मंत्रद्वयं पठित्वा कुशत्रयतिलजलान्यादाय ॐ अद्याशौ
चांतद्वितीयेऽह्नि अमुकगोत्रस्य पितुरमुकप्रेतस्य मोक्षकामो रुद्रदैवतं वृषभमेनं पतिं वो ददानि तेन क्रीडंतीश्चरथ प्रिये
ण मानः साप्रजनुषा सुभगा रायस्पोषेण समिषा मदेमेत्युत्सृजेत् लोहितो यस्तु वर्णेन पुच्छाग्रेण च पांडुरः श्वेतः खुरविषाणा
भ्यां स नीलो वृष उच्यते नीलवृषे नीलपद प्रक्षेपः कार्त्तिक्यां ३८

वृषोत्सर्गनिमित्तकमाभ्युदयिकं कृत्वा ओं अद्य कार्त्तिक्यां वृषमुत्सृज्यमानोऽहमिमानपूपान् विष्णुदैवतानमुकगोत्राया॰
मुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इत्यपूपत्रयं ब्राह्मणाय दद्यात् दक्षिणां च दद्यात् ओं कार्त्तिक्यामपूपान्दत्त्वाऽमुकगो
त्रस्य पितुरमुकप्रेतस्य मोक्षकामो रुद्रदैवतं वृषभमेनं युवानं पतिं वो ददानि तेन क्रीडंतीश्चरथ प्रियेण मा नः साप्त जनु
षा सुभगा रायस्पोषेण समिषा मदेमेति वाक्यं कर्त्तव्यं एतयै॰ वोत्सृजेरन्निति पारस्करवचनात् अनयैवर्चा उत्सर्गः
अस्यर्चोऽर्थस्तु हे वत्सतर्यो वो युष्माकमेनं पतिं स्वामिनं युवानं तरुणं ददानि त्यजानि तेनैतेन वृषेण प्रियेण सह क्रीडंतीः॰
त खेलंत्यश्चरथ भ्रमथ यूयमपि हे वत्सतर्यो मा नः नोऽस्माकं मनास्मत्स्वत्वविषयः किंतु मयात्यक्ताः वयं वृषस्य भवतीनां च॰
त्यागेन रायस्पोषेण धनसमृद्ध्या साप्तजनुषा सप्तजन्मव्यापकेन इषा अन्नेन च संमदेम हृष्टा भवेम सुभगा लोकस्य त
प्रिया इति ततऐशानीं दिशं पंचापि चालयेत् पूजयेत् एषोऽर्घः ओं सोपकरणाय वत्सतरीचतुष्टयसहितवृषभाय नमः इदम
नुलेपनं ओं सोपकरणाय वत्सतरीचतुष्टयसहितवृषाय नमः इति पुष्पैः एतानि धूपदीपताम्बूलनैवेद्यानि ओं सोपकरणाव
त्सतरीचतुष्टयसहितवृषाय नमः ततो वत्सतरीचतुष्टयमध्यगतं वृषमभिमंत्रयेत् तत्र मंत्रः ओं मयोभूरभि मावाहि स्वा
हा मरुतोऽसि मरुतां गणः शंभूर्मयोभूरग्निमावहि स्वाहा वसूरसि रुद्रस्त्वान्वभूर्मयोभूरभि मावहि स्वाहा यास्ते अग्ने सू
र्ये रुचो दिवमातन्वंति रश्मिभिः ताभिर्नो अद्य सर्वाभी रुचे जनाय नस्कृधि या वो देवाः सूर्ये रुचो गोष्वश्वेषु या रुचः
इंद्राग्नी ताभिः सर्वाभी रुचन्नो धत्त बृहस्पते रुचन्नो धेहि ब्राह्मणेषु रुचन्नो राजसु नस्कृधि रुचं विश्येषु शूद्रेषु म
यि धेहि रुचा रुचं तत्त्वा यामि ब्रह्मणा वंदमानस्तदाशास्ते यजमानो हविर्भिः अहेडमानो वरुणेह बोध्युरुशंस मान आयुः

ऽपि· जले स्वहस्ते दत्वं यं पाणौ तत्र दानं वाद्यं स्वर्णार स्वाहा स्वाहा

कृ· प्रमोषीः स्वर्णघर्मः स्वाहा स्वर्णार्कः स्वाहा स्वर्णशुक्रः स्वाहा स्वर्णज्योतिः स्वर्णसूर्य्यः ततः कृतापसव्यो दक्षिणामुखो वाम
प्री· जानुं पातयित्वा यवतिलकुशपुष्पमोदकादीन्यादाय ताम्रपात्रादिना मंत्रस्य फलमुद्दिश्य पांजलित्रयेण तर्पयेदनेन मंत्रेण
१४ ॐ स्वधा पितृभ्यो मातृभ्यो बंधुभ्यश्चापि तृप्तये मातृपक्षाश्च ये केचिद्ये चान्ये श्राद्धपितृपक्षजाः गुरुश्वशुरबंधूनां ये कु×
14 लेषु समुद्भवाः ये प्रेतभावमापन्ना ये चान्ये श्राद्धवर्जिताः वृषोत्सर्गेन ते सर्वे लभंतां प्रीतिमुत्तमां इति ततः कर्मकारमाहू
याभिमतं वेतनं तस्मै दद्यात् उत्सृष्टान्ब्राह्मणान् श्रावयेत् यत्किंचिद्धिमयोत्सृष्टं तदन्यो न नयेत् अथ कपिलादानं ॐ सोप
करणायै सवत्सकपिलगव्यै नमः ॐ ब्राह्मणाय नमः इति देयब्राह्मणौ त्रिः संपूज्य ॐ इमां सोपकरणां सवत्सां कपिलां द॰
दानीति द्विजकरे जलदानं जलेन देयद्रव्याभिषेचनं कुशादीन्यादाय ॐ अद्याशौचांतद्वितीयेऽह्नि अमुकगोत्रस्य पितुरमुक
प्रेतस्य स्वर्गप्राप्तिकाम इमां कपिलां गां हेमशृंगीं रौप्यखुरां वस्त्रयुगच्छन्नां कांस्योपदोहां मुक्तालांगूलविभूषितां सवत्सां
रुद्रदेवताममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति दद्यात् ॐ स्वस्तीति प्रतिवचनं ततो दक्षिणाद्रव्यादि
कमादाय ॐ अद्य कृतैतत्सोपकरणसवत्सकपिलगवीदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्म
णे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति दद्यात् ततः प्रतिगृहीता ॐ स्वस्तीति उक्त्वा गोपुच्छग्रहणं यथाशाखं कामस्तु
तिं च कुर्य्यात् ततः ॐ को दात् कस्मा अदात् कामो दात् कामायादात् कामो दाता कामः प्रतिगृहीता कामैतत्त इति यजुर्वे॰
दे ॐ क इदं कस्मा अदात् कामः कामायादात् कामो दाता कामः प्रतिगृहीता कामः समुद्रमाविशत् कामेन त्वा प्रतिगृह्णामि
कामैतत्ते इति सामवेदे कामस्तुतिः यथोक्तकपिलालाभे केवलामपि दद्यात् तत्र पूजादि पूर्ववत् ॐ अद्याशौचांतद्वितीयेऽह्नि ३९

अमुकगोत्रस्यपितुरमुकप्रेतस्यस्वर्गप्राप्तिकामइमांकपिलांगांरुद्रदेवतांअमुकगोत्रायामुकशर्म्मणेब्राह्मणायतुभ्यंम
हंसंप्रददेइतिदद्यात् ॐस्वस्तीतिप्रतिवचनं ततोदक्षिणाद्रव्यादिकमादाय ॐअद्यकृतैतत्कपिलगवीदानप्रतिष्ठार्थमिदं
हिरण्यमग्निदेवतममुकगोत्रायामुकशर्मणेब्राह्मणायदक्षिणांतुभ्यमहंसंप्रददेइतिदक्षिणांदद्यात् ॐस्वस्तीतिप्रति
वचनं गोपुच्छग्रहणंकामस्तुतिश्चपूर्ववत् ततोमहानद्यादौसचैलंस्नात्वातीर्थानिमनसाध्यात्वातज्जलेनात्मानमभ्युक्ष्य
उत्तरेत् अथैकादशाहश्राद्धप्रयोगः सचसुगतिसोपानानुसारेणलिख्यते तत्रपूर्वेद्युरात्रौनिमंत्रणासंभवेतस्मिन्नेवाह्नि
श्राद्धवेलायांमंडलाद्बहिः शुचिराचांतःशुक्लद्विवासागोमयोपलिप्तायांभूमौअपसव्यवत् कृतगोमूत्रमंडलायांभूमौ
पाद्बहिः ॐभूम्यैनमःइतित्रिःपुष्पाक्षतपूजितायांदर्भेषुतिष्ठन् पात्रब्राह्मणंयजमानसवर्णंनाहूतंस्नातमाचांतंस्वागत
अपिपृच्छेत् ॐसुस्वागतमितितेनोक्ते उभावप्युपविशतः ततःश्राद्धकर्त्ता ॐइदंतेपाद्यमितिपाद्यमुपनीयविनीतःसन्पु
नःपुनरभिनंद्यपात्रब्राह्मणपादौप्रक्षाल्यापसव्यादिकृत्वाजलतिलगंधपुष्पयुतमर्घपात्रमादायमोटकतिलजलानि
चादाय ॐअद्यामुकगोत्रपितरमुकप्रेतआद्यश्राद्धेएषपादार्घस्तेमयादीयतेतवोपतिष्ठतामितिपादार्घंदद्यात् शिरसाऽ
भिवंद्यजानुनिविश्याद्य ॐइदंतेआचमनीयमित्याचमनीयोदकंब्राह्मणायदद्यात् ततःस्वयंपादौप्रक्षाल्याचम्यापसव्या
दिकृत्वापुष्पचंदनतांबूलानिब्राह्मणायदत्वाब्राह्मणदक्षिणजानुस्पृष्ट्वा ॐअद्यामुकगोत्रस्यपितुरमुकप्रेतस्याद्यश्रा
द्धकरणायभवंतंब्राह्मणमहमामंत्रये ॐआमंत्रितोस्मीतिप्रतिवचनं ॐअक्रोधनेनशौचपरेणसततंब्रह्मवादिनाभ
वितव्यंभवताचमयाचश्राद्धकारिणा ॐसर्वायासविनिर्मुक्तेनकामक्रोधविवर्जितेनभवितव्यंभवतानोद्यतनेश्राद्धकर्म

श्र॰ दी॰ १५

णीति ब्राह्मणान्नियमान्श्रावयेत् ॐ भवितव्यमिति तेनोक्ते अर्घं परिकल्प्य मोटकादिकं चादाय ॐ अद्यामुकगोत्र पितरमु
क प्रेत आद्यश्राद्धे एष पादार्घस्ते मया दीयते तवोपतिष्ठतामिति पादार्घं दद्यात् ततः शिरसाभिवंद्य जानुनि विश्राम्य
ॐ इदं ते आचमनीयमित्याचमनजलं ब्राह्मणाय दद्यात् ततस्तिलतैलेन पात्रब्राह्मणपादावाजानु अभ्यंजयेत् ततः
स्वयं पादौ प्रक्षाल्याचम्य पात्रब्राह्मणमाचम्याग्रे कृत्वा स्वदेशमागत्योपविश्य पान्नाभिप्रा[illegible]सिद्धमिति पृच्छेत् दक्षि
णाग्रैककुशसहितनैपालकंबलाद्यात्मकं ब्राह्मणोपवेशनायासनमुपकल्प्यासनं स्पृशन् ॐ अत्रासने देवराजा॰
भ्यनुज्ञातो विश्रम्यतां द्विजवर्य्यानुग्रहात् प्रसादये त्वासनं गृह्णन्स्व तज्ज्ञानाग्निपूतेन करेण विप्र इति पठित्वा पात्रब्रा
ह्मणं दक्षिणहस्तेन धृत्वोदङ्मुखमुपवेशयेत् ततः पात्रस्य पदयोस्तले दक्षिणाग्रकुशत्रयं दद्यात् आसनसमीपे च
तिलतैलेन घृतेन वा श्राद्धसमाप्तिपर्य्यंतं स्थायिनं दीपं दद्यात् तद्रक्षार्थं च पात्रब्राह्मणेन कार्य्या रक्षोघ्नान् गौरस
र्षपान् तिलांश्च श्राद्धदेशं संनिधापयेत् काककुक्कुरादीन् श्राद्धहंतॄन् अपसारयेत् ततः पूर्वाभिमुखः कुशोदकेन ॐ
अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा यः स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः इति पठित्वा ॐ पुंडरीकाक्षः पुना
त्विति पुंडरीकाक्षं स्मृत्वा श्राद्धीयद्रव्याण्यात्मानं च सिंचेत् ततः कुशत्रयतिलजलान्यादाय ॐ अमुकगोत्रस्य पितुरमु
क प्रेतस्य प्रेतत्वविमुक्तिकामोऽद्यादि यथाकालं षोडश श्राद्धान्यहं करिष्य इति संकल्पयेत् एकादशमासाभ्यंतरेऽ
धिकमासपाते षोडशपदस्थाने सप्तदशपदं प्रयोज्यं पुनः कुशतिलजलान्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य ४०

प्रेतत्वविमुक्तिहेतुं षोडशश्राद्धांतर्गताद्यश्राद्धमहं करिष्ये इति संकल्पयेत् ॐ कुरुष्वेति ब्राह्मणप्रतिवचनं ॐ गायत्रीजप
महं करिष्ये इति पृष्ट्वा ॐ कुरुष्वेति ब्राह्मणानुज्ञातस्त्रिर्गायत्रीं जपेत् सव्याहृतिकां सप्रणवां वा जपनीया गायत्री ततः
ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च नमः स्वाहायै स्वधायै नित्यमेव नमो नमः इति त्रिर्जपेत् ततोपसव्यं कृत्वा
दक्षिणाभिमुखः पातितवामजानुर्मोटकादीन्यादाय ॐ अद्यामुकगोत्र पितरमुकप्रेत आद्यश्राद्धे इदमासनं ते मया
दीयते तवोपतिष्ठतामिति मोटकरूपमासनं तिलजलप्रोक्षितं दक्षिणाग्रमुत्सृजेत् ततः सव्यं कृत्वा प्राङ्मुख उपविश्य ॐ
छत्राय नमः ॐ ब्राह्मणाय नमः इति देय ब्राह्मणौ त्रिः संपूज्य इदं छत्रं ते ददानि इति द्विजकरे जलं दत्वा छत्रमभिषिच्य
कुशतिलजलान्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्यावरणकामः इदं छत्रमुत्तानां गिरो देवतममुकगोत्रायामुक
शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति दद्यात् ॐ स्वस्तीति प्रतिवचनं ततः तिलजलकुशान्दक्षिणाद्रव्यं चादाय
ॐ अद्य कृतैतच्छत्रदानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति
दक्षिणां दद्यात् ततः प्रतिगृहीता ॐ स्वस्तीति उक्त्वा छत्रं दंडेन धारयेत् ततः ॐ उपानद्भ्यां नमः ॐ ब्राह्मणाय नमः इति दे
य ब्राह्मणौ त्रिः संपूज्य ॐ इमे उपानहौ ददानीति द्विजकरे जलदानं उपानहावभिषिच्य कुशादीन्यादाय ॐ अद्यामुकगो
त्रस्य पितुरमुकप्रेतस्य तप्तवालुकासिकंथकितभूदुर्गसंतरणकामः इमे उपानहावुत्तानांगिरोदेवते अमुकगोत्रायामुक
शर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति दद्यात् ॐ स्वस्तीति प्रतिवचनं ततः कुशादीन्दक्षिणाद्रव्यं चादाय ॐ अद्य कृतैतदु
पानह्दानप्रतिष्ठार्थमिदं हिरण्यमग्निदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय तुभ्यमहं संप्रददे इति दद्यात् ततः प्रतिगृ

हीता ॐस्वस्तीत्युक्त्वाउपानहावारोहेत् ततःअपसव्यं कृत्वादक्षिणाभिमुखः पातितवामजानुः ॐअपहताअसुरारक्षांसि
वेदिषदइतिवामावर्त्तेन श्राद्धदेशेतिलान्विकीर्य्य सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः अस्मिन्यज्ञेस्वधयामदंतोधिब्रु
वंतुतेऽवंत्वस्मान् इतिजपेत् ततोर्घपात्रोपरि अनग्रछिन्नंदक्षिणाग्रंपवित्रंधृत्वा ॐशन्नोदेवीरभिष्टयआपोभवंतुपीत
येशंय्योरभिस्रवंतुनः इतिमंत्रेणार्घपात्रेजलंदत्त्वा ॐतिलोसिसोमदेवत्योगोसवोदेवनिर्मितः प्रत्नमद्भिः पृक्तःस्वध
यापितॄन्लोकान्प्रीणाहिनःस्वाहेति तिलान्प्रक्षिप्य गंधंपुष्पंतूष्णींतत्रप्रक्षिप्यार्घपात्रंवामहस्तेकृत्वापवित्रंविप्रकरे
उत्तराग्रंदत्त्वा तदुपरिकिंचिदुदकांतरंदत्त्वा ॐयादिव्याआपः पयसासंबभूवुर्याअंतरिक्षाउतपार्थिवीर्याः हिरण्यवर्णा
यज्ञियास्तानआपः शिवासशंस्योनाः सुहवाभवंतुइतिपठित्वा मोटकादीन्यादाय ॐअद्यामुकगोत्रपितरमुकप्रेतआ
द्यश्राद्धेएषहस्तार्घस्तेमयादीयतेतवोपतिष्ठतामितिब्राह्मणकरेपवित्रोपरिअर्घजलंददकुत्सृजेत् पात्रं वामपार्श्वे
ॐपितृभ्यःस्थानमसीतिअर्घपात्रंसपवित्रमधोमुखंस्थापयेत् तच्चदक्षिणादानपर्यंतंनचालयेत् ततः श्राद्धदेशेतिलान्
विकीर्य्यदर्भहस्तोभूतलेप्रेतमाह्वयेत् तत्रमंत्रः इहलोकेपरित्यज्यगतोसिपरमांगतिमिति अत्रस्त्रीश्राद्धेपिगतासीत्ये
वमेवपठनीयमात्मत्वेनोद्देश्यत्वात् ततोमोटकादीन्यादाय ॐअद्यामुकगोत्रपितरमुकप्रेतआद्यश्राद्धेएतानिगंधपु
ष्पधूपदीपतांबूलयज्ञोपवीतवासांसितेमयादीयंतेतवोपतिष्ठतामितिगंधादीनुत्सृजेत् ततः ॐसर्वःसुगंधइतिमंत्रे
णगंधं ॐश्रियादेव्याइतिमंत्रेणपुष्पं ॐवनस्पतिरसामितिमंत्रेणधूपं ब्राह्मणायनिवेदयेत् ततः ॐएषदीपःइतिदीपंनिवेदि
ते ॐसुदीपइतिब्राह्मणोवदेत् ॐएतानितांबूलानिइतितांबूलेनिवेदिते ॐसुतांबूलानीतिब्राह्मणोवदेत् ॐएतानिवासां ४२

सीतिनिवेदिते ओंसुवासांसीतिब्राह्मणोवदेत् पुष्पाणि शिखायामेवद्विजेनधार्य्याणि ततः प्रेतोपभुक्तशय्यासनानिगंधैः
पुष्पैरभ्यर्च्यश्राद्धभोक्त्रे प्रतिपादयेत् ततोगोमयमृत्तिकयानीवारादिचूर्णेनजलेनब्राह्मणंवेष्टयित्वाचतुरस्रंमंडलंकुर्या
त् परकीयभूमौश्राद्धकरणेश्राद्धीयवस्तुषुकिंचित्किंचिदुद्धृत्यतिलजलघृतयुक्तमन्नं ओंइदमन्नमेतद्भूमिस्वामि 33
पितृभ्योनमः इतिदद्यात् जीवितोभूस्वामिनो किंचिदाप्रीतिकरंदद्यात् ततउष्णमन्नंताम्रपात्रेणकराभ्यामादायमना
कुंस्थित्वापितरंध्यात्वापुरुषतृप्तिपर्याप्तमंपरिविष्यात् ततइदंमधुरमिदमत्युष्णमिदमन्नमित्यादिव्यंजनगुणान्कीर्तय
न्मांसादीनिव्यंजनानिभूयिष्ठपात्रांतरेषुपरिविष्य घृतंससतिलजलंचोपनीयान्नंमधुनाभिघारयेत् ततः ओंमधुवा
ताऋतायतेमधुक्षरंतिसिंधवः माध्वीर्नःसंत्वोषधीः मधुनक्तमुतोषसोमधुमत्पार्थिवंरजः मधुद्यौरस्तुनःपितामधु
मान्नोवनस्पतिर्मधुमांअस्तुसूर्य्यः माध्वीर्गावोभवंतुनः मधुमधुमधु इतिचपठित्वा व्यस्तमुत्तानपाणिभ्यामन्नपात्र
मालभ्य ओंपृथिवीतेपात्रंद्यौरपिधानंब्राह्मणस्यमुखेऽमृतेऽमृतंजुहोमिस्वाहा इतिजपेत् ओंविष्णुर्विचक्रमेत्रेधानि इदं
दधेपदंसमूढमस्यपांसुरे इतिपठन्नमृतयाऽन्नंविचिंत्य ओंकृष्णकव्यमिदंरक्षस्वमदीयमितिपठित्वा ओंइदमन्नं ओं
इमाआपः ओंइदमाज्यं ओंइदंहविरितिपात्रंब्राह्मणांगुष्ठमन्नजलघृतान्नेषुनिवेश्य ओंअपहताअसुरारक्षांसिवेदिष
दइत्यन्नोपरिवहून्तिलान्विक्षिप्यमोटकादीन्यादायवामेनपाणिनापात्रमत्यजन् ओंअद्यामुकगोत्रपितरमुकप्रेत
आद्यश्राद्धइदमन्नंसोपकरणंतेमयादीयतेतवोपतिष्ठतामित्युत्सृजेत् ततोभवान्प्राशयत्विति विप्रायापोशानंदत्वासप्र
णवांसव्याहृतिकांगायत्रीं ओंमधुवाताइत्यादिस्वचं ओंमधुमधुमधिवितिचजपित्वा ओंअन्नहीनंक्रियाहीनंविधिहीनंचय

च्छवेत् तत्सर्वमच्छिद्रमस्त्विति च पठित्वा ॐ यथासुखं जुषस्वेति ब्राह्मणं प्रतिब्रूयात् ब्राह्मणश्च वामेन पाणिना पात्रमत्यजन्नॐ
कारपूर्वं भुंजीत संज्ञया विभज्य प्रार्थनं न कुर्यात् श्राद्धकर्त्ता दर्भेष्वासीनः सप्रणवव्याहृतिकां गायत्रीं मधुवाता इत्यादि सर्वं
ॐ मधु मधु मधु इति जपेत् गायत्रीं ब्राह्मणं श्रावयित्वा ॐ कृणुष्व पाज इत्यादीन् रक्षोघ्नान्मंत्रान्पठित्वा भूमिं तिलैरास्ती
र्य ब्राह्मणं पितृरूपतया ध्यायेत् ततः ॐ उदीरितामित्यादि पितृमंत्रान् ॐ सहस्रशीर्षा इत्यादि पुरुषसूक्तं ॐ आशुः शि
शानो इत्यादिकमप्रतिरथमन्यादीनि शतरुद्रियप्रभृति पवित्राणि रुचिस्तवप्रभृतीनि च पठेत् ततः नमस्तुभ्यं विरूपा
क्ष नमस्तेनेकचक्षुषे नमः पिनाकहस्ताय वज्रहस्ताय वै नमः इति श्लोकमपि पठेत् वीणादिभिर्ब्राह्मणं हर्षयन् व्यंज ॐ
नादिगुणान्कीर्त्तयन् तस्य यत्र यत्रेच्छोपलभ्येत तत्तदुपनयन् मंदं मंदं भोजयेत् ततस्तत्तृप्तिं ज्ञात्वा उच्छिष्टसन्निधावा
स्तृतदक्षिणाग्रकुशत्रयां भूमिं प्रोक्ष्य सर्वप्रकारकमन्नं तिलघृतसहितं जलेनाप्लाव्य गृहीत्वा ॐ अग्निदग्धाश्च ये
जीवा ये प्रदग्धाः कुले मम भूमौ दत्तेन तृप्यंतु तृप्ता यांतु परां गतिमिति मंत्रेण मंत्रस्य फलमुद्दिश्य कुशोपरि तदन्नं विकि
रेत् ततः स्वयं कृत्वाचम्य हरिं स्मृत्वापसव्यं कृत्वा दक्षिणाभिमुखो ब्राह्मणाय जलगंडूषमिदं ते प्रत्यपोशानमिति दत्त्वा
ॐ स्वदितमिति ब्राह्मणं पृच्छेत् ॐ सुस्वदितमिति तेनोक्ते ॐ पिंडमहं करिष्ये इति पृच्छेत् कुरुष्वेति ब्राह्मणानुज्ञातः उच्छिष्ट
संनिधौ चतुरस्रं हस्तैकप्रमाणं दक्षिणाप्लवं चतुरंगुलोच्छ्रितं स्थानं निर्माय तन्मध्ये वामहस्तेन दर्भपिंजलीमादाय तन्
मूलेन वामान्वारब्धदक्षिणकरेण प्रादेशमात्रं ॐ अपहता असुरा रक्षांसि वेदिषद इति मंत्रेण रेखामुल्लिखेत् दर्भपिंज
लीमुत्तरस्यां दिशि क्षिपेत् तदुपरि ॐ ये रूपाणि प्रतिमुंचमाना असुराः संतः स्वधया चरंति परापुरो निपुरो ये भरंत्यग्नि

ष्टांल्लोकान्प्रणुदात्यस्मादिति उल्मुकं भ्रामयित्वा रेखादक्षिणतः क्षिपेत् तदुपरि उपमूलसकृल्लूनकुशान्दक्षिणा॰
ग्रानास्तीर्य्य सव्यं कृत्वा ॐ देवताभ्य इति त्रिर्जपेत् ततोपसव्यं कृत्वा पत्रपुटकादिकमेकं तिलजलगंधपुष्पयुतं वामहस्ते कृ
त्वा दक्षिणहस्तेन मोटकादिकमादाय ॐ अद्यामुकगोत्र पितरमुक प्रेतआद्यश्राद्धपिंडस्थानेऽत्रावनेनिक्ष्व ते मया दीयते
तवोपतिष्ठतामिति कुशोपरि अवनेजनं दद्यात् ततः श्राद्धशेषमन्नं सर्वव्यंजनतिलघृतमधुयुतमेकीकृत्य तेन विल्वप
रिमाणं पिंडं निर्माय घृतमध्वभिघारितं कृत्वा दक्षिणहस्तेनादाय मोटकादीनि चादाय ॐ अद्यामुकगोत्र पितरमुक प्रे
तआद्यश्राद्धे एष पिंडस्ते मया दीयते तवोपतिष्ठतामिति कुशोपरि अवनेजनस्थाने सव्योपगृहीतदक्षिणकरेण पिंडं द
द्यात् आस्तृतदर्भमूले करं प्रोंछ्य सव्यं कृत्वाचम्य हरिं स्मृत्वापसव्यं कृत्वा ॐ अत्र पितर्मादयस्व यथाभागमावृषायस्व
इति पठित्वा वामावर्त्तेनोदङ्मुखो भूत्वा मनाक् श्वासं नियम्य तेनैव यथासुखं पर्य्यावर्त्तयन् पितरं भास्वरमूर्त्तिं ध्यायन् ॐ अ
मीमदंत पिता यथाभागमावृषायिषतेति पठेत् अवनेजनावशिष्टजलयुतं पात्रं वामहस्ते कृत्वा दक्षिणहस्तेन ॐ अद्यामुकगो
त्र पितरमुक प्रेतआद्यश्राद्धपिंडेऽत्र प्रत्यवनेनिक्ष्व ते मया दीयते तवोपतिष्ठतामिति पिंडोपरि प्रत्यवनेजनं दद्यात् ततो नीवीवि
स्रंस्य सव्यं कृत्वाचम्य हरिं स्मृत्वापसव्यं कृत्वा वामेन पाणिना धृतं सूत्रं दक्षिणहस्तेन गृहीत्वा ॐ एतत्ते पितर्वासः इति पिं
डोपरि धृत्वा मोटकादिकमादाय ॐ अद्यामुकगोत्र पितरमुक प्रेतआद्यश्राद्धपिंडे एतद्वासस्ते मया दीयते तवोपतिष्ठतामि॰
त्युत्सृजेत् ततस्तस्मीपिंडे गंधपुष्पधूपदीपतांबूलानि दद्यात् ततः पिंडशेषान्नं पिंडसमीपे विकिरेत् ततआचांतस्य ब्राह्मणस्य
करे ॐ अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितं ब्राह्मणस्य करे न्यस्ताः शिवा आपो भवंतु मे इति जलं दद्यात् ॐ भवंतु ते इ

श्रा॰ श्री॰ १८

तिब्राह्मणस्य प्रतिवचनं ततः ओं लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसति पुष्करे लक्ष्मीर्वसति गोष्ठेषु सौमनस्यं सदास्तु मे इति पुष्पा
णि दद्यात् ओं अस्तु सदा तवेति प्रतिवचनं ओं अक्षतं चास्तु मे पुण्यं शान्तिः पुष्टिर्धृतिश्च मे यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा म
मेति तंडुलान्दद्यात् ओं अस्तु सदा तवेति प्रतिवचनं अथवा ओं शिवा आपः सन्त्विति जलं ओं सौमनस्यमस्तु इति पुष्पं ओं अक्षतं
चारिष्टमस्त्विति तंडुलान्दद्यात् ओं सन्त्विति ओं अस्त्विति प्रतिवचनं ततः पुटकादि पात्रे शान्त्युदकं परिकल्प्य मेदिनीं शिरसा
ऽभिवंद्य इमं मंत्रं पठेत् ओं नमो नमो मेदिनि लोकधात्रि उर्वि महि शैलगिरिधारिणि धरणि नमः धरणि काश्यपि जगत्स्थिति।
ए वसुधे नमोस्तु वैष्णव लोकधात्रि नमोस्तुते सर्वरसप्रतिष्ठे नैवापनारीवन नमो नमोस्तुते ततो मोटकादिकमादाय ओं अद्या
मुकगोत्रस्य पितुरमुकप्रेतस्याद्यश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठतामिति विप्रकरेऽक्षय्योदकं दद्यात् ओं उपतिष्ठतामि
ति प्रतिवचनं ततः सव्यं कृत्वा प्राङ्मुखः कृतांजलिः तन्मनाः सुमना दक्षिणां दिशमपश्यन् ओं अघोरः पितास्त्विति पठेत् अ
त्र पूर्वाभिमुखो पिंडोपरि जलधारां ददानीत्याचारः ओं अस्त्विति प्रतिवचनं ततः पूर्वाभिमुखः ओं गोत्रं नो वर्द्धतामिति वदेत्
ओं वर्द्धतामिति प्रतिवचनं ओं दातारो नोऽभिवर्द्धन्तां वेदाः संततिरेव च श्रद्धा च नो माव्यगमद्बहुदेयं च नो भवेत् अन्नं च नो
बहु भवेदतिथींश्च लभेमहि याचितारश्च नः संतु मा च याचिष्म कंचन एताः सत्या आशिषः सन्त्विति आशिषो ब्राह्मणान्या
चेत् ओं सन्त्विति ब्राह्मणप्रतिवचनं ततोऽपसव्यं कृत्वा सपवित्रकुशत्रयं पिंडोपरि दक्षिणाग्रं कृत्वा ओं नमो वाचयिष्ये इति पृ
छेत् ओं वाच्यतामित्यनुज्ञातः ओं पितृभ्यो नमः इत्युच्यतामिति वदेत् ओं अस्तु नमः इति प्रतिवचनं ततः पुटकादिस्थितं जलं गृही
त्वा ओं ऊर्जं वहंतीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्थ तर्पयत मे पितरमिति दक्षिणाग्रां जलधारां सपवित्रकुशोपरि ४२

गत्रकूणि नवत्स

दद्यात् ततो नम्रीभूय पिंडमाघ्रायोत्थापयेत् पिंडाधारकुशानुल्मुकं च वह्नौ क्षिपेत् ततोऽर्घपात्रमुत्तानीकृत्य मोदकति
लजलान्यादाय दक्षिणाद्रव्यं चादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य कृतैतदाद्यश्राद्धप्रतिष्ठार्थमिदं रजतं चंद्रदैवत
य ममुकगोत्रायामुकशर्मणे ब्राह्मणांदक्षिणां तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् ॐ स्वस्तीति ब्राह्मणप्रतिवचनं ततः श्रा॰
द्धकर्त्ता पात्रं ब्राह्मणस्य चरणौ संवाह्य तं नमस्कुर्यात् ततो दक्षिणेन पाणिना पात्रं ब्राह्मणाद्दक्षिणपाणिं गृहीत्वा शय्यासन
मंजनकं कतिकां चार्पयेत् ब्राह्मणस्त्वंजनकं कतिकां चादाय शय्यामाक्रम्य मुहूर्तं विश्राम्येत् ततः सामवेदाध्यायिब्राह्म
आतपेषु:पात्र मातेषवि णस्ताम्रपात्रस्थं तिलोदकमुपाहरेयुः ततः श्राद्धकर्त्ता तेन जलेन गृहस्थितं द्रव्यमभिषिंचेत् ततः सव्यं विधाय ॐ अग्नि
मुखवदेवास्तर्पयंतामिति यवयुतजलेन कुशैः कुशोपरि तर्पयेत् अवशिष्टमन्नं ॐ भूतेभ्य एष बलिर्नम इति जलपुष्पाभ्यां ब
लिं दद्यात् ततः सामगब्राह्मणान् भोजनादिभिः संतोषयेत् ततोपसव्येन ॐ निरोकारे स्वस्ति ब्रूहीति ब्राह्मणायवदेत् स्व
स्तीति ब्राह्मणो ब्रूयात् स्वस्त्यस्त्वित्युक्त्वा ब्राह्मणमुत्थाप्य जलपात्रं गृहीत्वा निमंत्रणस्थानस्थितं ब्राह्मणं ॐ आमावा
जस्य प्रसवो जगम्यादेमे द्यावापृथिवी विश्वरूपे आमागंतां पितरोमातरो वामा मा सोमो अमृतत्वेन गम्यात् इति पठन् प्रद॰
क्षिणीकुर्वन् वारिधारया त्रिर्वेष्टयित्वा प्रणम्याष्टौ पादाननुव्रज्य प्रदक्षिणीकृत्याभिवादयेत् सव्यं कृत्वा ॐ देवताभ्य
इति जपित्वा गृहं प्रविशेत् ततः पाणिभ्यामपसव्येन श्राद्धीयदीपनिर्वापनं हस्तपदप्रक्षालनं सव्येनाचमनं कुर्यात् ततः
श्राद्धपूर्णताकामः ॐ प्रमादात्कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः इति पठित्वा वि
ष्णुस्मरणं कुर्यात् ततोशौचांते द्वितीयदिन एव यथाशक्ति महार्हाणि रत्नानि गाः वाहनं यानादि दासं दासीं महांति वेश्मानि

नी

८ दमातनंतेमयानमः ओं अद्यघा०

अशौचनिर्मुक्तानि प्रेतहितमुद्दिश्य ब्राह्मणाय दद्यात् तद्यथा ओं अद्याशौचांतद्वितीयेह्नि अमुकगोत्रस्य पितुरमुकप्रेतस्य
स्वर्गप्राप्तिकाम इमां गां रुद्रदैवतां यथानामगोत्राय ब्राह्मणाय दातुमहमुत्सृजे इति गां दद्यात् ओं अद्य कृतैतद्गोदानप्रति
ष्ठार्थमिदं हिरण्यमग्निदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इति यथाशक्ति दक्षिणां दद्यात् एवं भूमि
हिरण्यदानमपि अस्मिन्दिने दशप्रभृतीन्श्रोत्रियान्भोजयेत् तान्परितोषयेच्च अत्रादिने विहितमपि पंचगव्यपानं शिष्टा
नाचरंतीति न लिखितं अथोदकुंभदानं तत एकादशाहश्राद्धं कृत्वा च मध्ये प्राङ्मुख उपविश्य कुशतिलजलान्यादाय ओं पित
गताहरहरन्नोदकुंभोपस्थितिस्वर्गताश्वमेधयज्ञजन्यफलप्राप्तिकामो द्यादिपितृमरणादिनावधिकाशौचावच्छिन्न
दिनोनवत्सरं यावत्प्रत्यहं पित्रे सान्नोदकुंभस्ते मया दीयते तवोपतिष्ठतामित्युत्सृजेत् तद्भयंपात्र ब्राह्मणाय प्रतिपादयेत् दक्षिणां
अशौचोपनिपाते प्यथं दातव्य इति सपिंडने कृते वर्षाभ्यंतरे ओं अद्यामुकगोत्र पितरमुकशर्मन्नयं सान्नोदकुंभस्तुभ्यं स्वधे
ति वाक्यं कुर्यात् ततो मोटकादीन्यादाय ओं अद्य कृतैतत्सान्नोदकुंभदानप्रतिष्ठार्थमिदं रजतं चंद्रदैवतं यथानामगोत्राय
ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इति प्रत्यहं सान्नोदकुंभं दत्वा दक्षिणां दद्यात् अत्र द्वादशाह श्राद्धं कार्यमिति केचि
त् तदप्येकादशाहवत् अथ मासिकश्राद्धप्रयोगः तत्र श्राद्धपूर्वदिने एकभक्तादिकं विधाय प्रातः श्वेतवस्त्रयुगेन स्नात्वा म
ध्यंदिने पुनः स्नात्वा कृतनित्यक्रियः आचांत उपविष्टः पूर्वोपकल्पितं प्रज्वालितप्रदीपं स्थापितगौरसर्षपतिलादिरक्षोघ्नं
श्राद्धदेशमागत्य ओं सिद्धिमिति पृष्ट्वा कुशत्रयजलेन ओं अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा यः स्मरेत्पुंडरीकाक्षं स
वाह्याभ्यंतरः शुचिः इति पठित्वा ओं पुंडरीकाक्षः पुनात्विति उच्चार्य श्राद्धदेशं द्रव्याण्यात्मानं च सिंचेत् 44
कुंभस्थाने इदमान्नं तेमयादीयते तवोपतिष्ठतां ओं अद्यामुकगोत्रपितरमुकशर्मन् प्रेतायं सान्नोदक

ॐअद्यामुकगोत्रस्यपितुरमुकप्रेतस्यप्रेतत्वविमुक्तिहेतुंषोडशश्राद्धांतर्गतप्रथममासिकश्राद्धमहंकरिष्यइतिसंकल्पं
कुर्यात् एकादशमासाभ्यंतरेऽधिकमासपाते षोडशपदस्थाने सप्तदशपदं प्रयोज्यं ततस्त्रिःगायत्रींजपित्वा ॐदेवताभ्यः
पितृभ्यश्च महायोगिभ्यएवच नमःस्वाहायैइत्यादित्रिर्जपेत् ततोपसव्यादिकृत्वा मोटकादीन्यादाय ॐअद्यामुकगोत्र
पितरमुकप्रेत प्रथममासिकश्राद्धइदमासनंतेमयादीयतेतवोपतिष्ठतामितिआसनमुत्सृजेत् ततः अपहताइत्यादिवामा
वर्त्तेन श्राद्धदेशेतिलान्विकिरेत् ततः ॐआयंतुनःपितरः इतिमंत्रंपठेत् पुटकादौपवित्रंदक्षिणाग्रंधृत्वा ॐशन्नोदेवी
रितिमंत्रेणतत्रजलंक्षिपेत् ॐतिलोसिइत्यादिमंत्रेणतिलान्क्षिपेत् तूष्णींगंधपुष्पंचक्षिपेत् ततस्तदर्घपात्रंवामहस्तेकृ
त्वा पवित्रमन्नपात्रोपरि उत्तराग्रंधृत्वा तदुपरिकिंचिदुत्तानं दत्वा ॐयादिव्याआपः इत्यादिपठित्वा दक्षिणहस्तेनमोट
कादीन्यादाय ॐअद्यामुकगोत्रपितरमुकप्रेत प्रथममासिकश्राद्धे एषहस्तार्घस्तेमयादीयतेतवोपतिष्ठतामितिपवि
त्रोपरिजलंदद्यात् ततः पवित्रादिसहितमर्घपात्रमासनवामपार्श्वे ॐपित्रेस्थानमसीतिन्युब्जंकुर्यात् पुनर्मोटका
दीन्यादाय ॐअद्यामुकगोत्रपितरमुकप्रेतप्रथममासिकश्राद्धे एतानिगंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासां प
सितेमयादीयंतेतवोपतिष्ठंतामिति गंधादिकमुत्सृजेत् ततः आसनस्यभोजनपात्रसहितस्यचतुर्दिक्षुंचतुरस्रं
मंडलंजलेनकृत्वाश्राद्धीयान्नाग्रभागंघृतव्यंजनतिलजलयुतंपुटकादौकृत्वा ॐइदमन्नमेतद्भूस्वामिपित
भ्योनमइत्युत्सृजेत् ततस्ताम्रपात्रादिस्थितमन्नंहस्ताभ्यामादायमनाक्स्पृष्ट्वापितरंध्यायन् भोजनपात्रेउप

श्रा. षो. २०

ॐ

नयत् ॐ रूक्षत्र्विन्नमंत्रमन्नंपरिविष्य भूमिष्ठपात्रांतरे षु व्यंजनान्युपकल्प्य पुटकस्थितं घृतं सतिलजलं चोपनीयान्नोपरि ह
स्तद्वयगृहीतपात्रेण मधु दद्यात् ततः ॐ मधुवाता इत्यादि स्त्र्यृचं ॐ मधु मधु मधिति च जपेत् ततो व्यत्यस्तहस्ताभ्यामन्नपात्र
मालभ्य ॐ पृथिवी ते पात्रं इत्यादि ॐ विष्णुर्विचक्रमे ॐ कृष्ण कव्यमित्यादि पठित्वा वामेन पाणिनाऽन्नपात्रमत्यजन् दक्षिणह
स्तांगुष्ठमन्नजलघृतान्नेषु ॐ इदमन्नं इमा आपः ॐ इदमाज्यं ॐ इदं हविरिति निक्षिप्य ॐ अपहता असुरा इत्यन्नोपरि तिला
न्विकीर्य्य दक्षिणहस्ते मोटकादीन्यादाय ॐ अद्यामुकगोत्र पितरमुकप्रेत प्रथममासिकश्राद्धे इदमन्नं सोपकरणं ते मया
दीयते तवोपतिष्ठतामित्युत्सृजेत् ततो गायत्री मधुवाता इत्यादि स्त्र्यृचं मधु मधु मधिति च जपेत् अन्नहीनमित्यादि मंत्रं पठेत् ततः
कुशेषूपविश्य पुनर्गायत्री ॐ मधुवाता ॐ मधु मधु मधिति जपेत् रक्षोघ्नमंत्रान् कृणुष्व पाज इत्यादिकान् जपेत् भूमौ तिला
न् क्षिप्त्वा पित्र्यमंत्रपुरुषसूक्ताप्रतिरथादीनि पवित्राणि यथाशक्ति जपेत् ततः ॐ नमस्तुभ्यं विरूपाक्षेति श्लोकमपि पठेत् ततः
उच्छिष्टसंनिधावास्तृतकुशत्रयां भूमिं प्रोक्ष्य व्यंजनघृततिलयुतमन्नं वारिणा प्लाव्य ॐ अग्निदग्धाश्चेत्यादिना कुशोप
रि तदन्नं विकिरेत् ततः सव्यं कृत्वाचम्य हरिं स्मृत्वा पिंडस्थानं निर्माय तन्मध्ये वामहस्तोपात्तदक्षिणहस्तगृहीतदर्भपिंज
लीमूलेन प्रादेशमात्रं अपहतेत्यादिनोल्लिख्य दर्भपिंजलीमुत्तरतस्त्यजेत् ततो रेखोपरि ये रूपाणीति मंत्रेणांगारं भ्रामयित्वा
अंगारं दक्षिणतः क्षिपेत् ततो रेखोपरि उपमूलसकृल्लूनकुशत्रयं दक्षिणाग्रमास्तीर्य्य सव्यं कृत्वा पुटके जलतिलपुष्प
गंधानि कृत्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्र पितरमुकप्रेत प्रथममासिकश्राद्धपिंडस्थाने अत्रावनेनिक्ष्व ते मयादी
यते तवोपतिष्ठतामित्यवनेजनं कुशोपरि दद्यात् ततस्तिलघृतमधुयुतेनान्नेन पिंडं कृत्वा घृतमधुभ्यामभिघार्य्य दक्षिणहस्तेन

मासमासे मासिकं कुर्यादिति
श्राद्ध

४५

मोटकादीन्निधाय ॐ अद्यामुकगोत्र पितरमुकप्रेत प्रथममासिकश्राद्धे पिंडस्थाने एष पिंडस्ते मया दीयते तवोपतिष्ठता ।
मोटकादीनिचादाय ॐ अद्यामुकगोत्रपितरमुकप्रेतप्रथममासिकश्राद्धे पिंडस्थाने एष पिंडस्ते मया दीयते तवोपतिष्ठता
मितिवामान्वारब्धदक्षिणहस्तेनावनेजनस्थाने पिंडं दद्यात् ततो दर्भमूले करं प्रोंछ्य सव्यं कृत्वा दक्षिणाभिमुखः ॐ अत्र पितर्मा
दयस्व यथाभागमावृषायस्वेति पठेत् ततः उत्तराभिमुखीभूय श्वासं नियम्य पितरं भास्वरमूर्त्तिं ध्यायन्मुखं पर्यावर्त्तयन् ॐ अमीमद
तपिता यथाभागमावृषायिष्टेति पठेत् ततोवनेजनपात्रे दत्तावशिष्टजलयुतं वामहस्ते कृत्वा दक्षिणहस्तेन मोटकादीन्यादा
य ॐ अद्यामुकगोत्रपितरमुकप्रेत प्रथममासिकश्राद्धपिंडे अत्र प्रत्यवनेनिक्ष्व ते मया दीयते तवोपतिष्ठतामिति प्रत्यवनेजनं
पिंडोपरि दद्यात् ततो नीवीविस्रंसस्य सव्यं कृत्वा वामेन पाणिना धृतं सूत्रं दक्षिणेनादाय उभाभ्यां पिंडोपरि ॐ एतत्ते पितर्वासइ
तिसूत्रं दत्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रेत प्रथममासिकश्राद्धपिंडे एतद्वासस्ते मया दीयते तवोपति
ष्ठतामिति सूत्रमुत्सृजेत् ततस्तूष्णीं गंधपुष्पधूपदीपतांबूलादि दद्यात् ततः पिंडशेषान्नं पिंडसमीपे विकीर्य्य ॐ शिवा आपः
संत्विति जलं ॐ सौमनस्यमस्त्विति पुष्पं ॐ अक्षतं चारिष्टमस्त्विति तंडुलान् अन्नपात्रोपरि क्षिपेत् ॐ मोटकादीन्यादाय ॐ अ
द्यामुकगोत्रस्य पितुरमुकप्रेतस्य प्रथममासिकश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठतामिति अक्षय्योदकं दद्यात् ततः स
व्यं कृत्वा ॐ अघोराः पितरः संत्विति दक्षिणां दिशं पश्यन् पिंडोपरि पूर्वाग्रां जलधारां दद्यात् ततः पूर्वाभिमुखीभूय ॐ गोत्रं नो वर्द्ध
तां दातारो नोभिवर्द्धतां वेदाः संततिरेव चेत्यादिना आशीः प्रार्थनं कुर्यात् ततोपसव्येन पिंडोपरि सपवित्रान्कुशान्धृत्वा पुट
कादिस्थजलेन ॐ ऊर्जं वहंतीरमृतं घृतं पयः कीलालं परिस्रुतम् स्वधास्थ तर्पयत मे पितरमिति कुशोपरि दक्षिणाग्रां ज
लधारां दद्यात् ततः पिंडमाघ्रायोत्थापयेत् पिंडाधारकुशानुल्मुकं च वह्नौ क्षिपेत् अर्घपात्रमुत्थाप्य मोटकादीन्यादाय
ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य कृतैतत्प्रथममासिकश्राद्धप्रतिष्ठार्थमिदं रजतं चंद्रदैवतं यथानामगोत्राय ब्राह्म

णायदक्षिणांदत्तुमहमुत्सृजे इति दक्षिणां दद्यात् ततः सव्यं ॐ देवताभ्य इति त्रिर्जपेत् ततोपसव्यं कृत्वा पाणिना दीपं निर्वाप्य।
हस्तपादप्रक्षालनं सव्यमाचमनं च कुर्यात् ॐ प्रमादादित्यादि पठित्वा विष्णुं स्मरेत् आहीयवस्त्रं निपात्र ब्राह्मणाय प्रतिपाद
येत् जले वा क्षिपेत् प्रायेणापात्रिकमेव मासिकश्राद्धं कुर्वतीत्यपात्रिकप्रयोगो लिखितः एवमेव द्वितीयमासिकं तृतीयमासि
कं चतुर्थमासिकं पंचममासिकं ऊनषाण्मासिकं षष्ठमासिकं सप्तममासिकं अष्टममासिकं नवममासिकं दशममासिकं एकादश
मासिकं ऊनवार्षिकं द्वादशमासिकं श्राद्धं कुर्यात् तत्पदप्रक्षेपेन प्रयोगऊह्यः अधिकमासपाते एकादशमासिकानंतरं द्वादशमा
सिकं ततऊनवार्षिकं ततस्त्रयोदशमासिकं श्राद्धमिति क्रमः सपात्रिकश्राद्धकरणे ब्राह्मणनिमंत्रणस्वागतप्रश्नपादार्घदा
नाचमनीयदानब्राह्मणोपवेशनप्रश्नप्रतिवचनगंधादिप्रत्येकं निवेदनापोशानदानप्रत्यपोशानदानस्वदितप्रश्नाक्षय्यो
दकदानादिप्रतिवचननमो वाचनब्राह्मणविसर्जनानि विशेषः अन्यद्यश्राद्धप्रयोगवदूह्यमिति अथ सपिंडनश्राद्धप्रयोगः त
त्राधुनिकाः प्रेतश्राद्धातिरिक्तं श्राद्धचतुष्टयं सपात्रकमेव कुर्वतीति तथैव लिख्यते तत्र पूर्वदिने निरामिषमेकवारं भुक्त्वा
रात्रौ सर्वभुक्तजने गृहे विप्रनिवेशनं गत्वा दक्षिणाप्लवगोमयोपलिप्तायां भूमौ आचांतः उपविष्टस्य ब्राह्मणस्य करे दक्षादक्षिण
करेण ब्राह्मणदक्षिणजानुं स्पृष्ट्वा ॐ अस्यां रात्रौ अमुकगोत्रस्य पितुरमुकप्रेतस्य श्वः सपिंडीकरणश्राद्धकरणाय भवं त
ब्राह्मणमहमामंत्रये इत्यामंत्रणं कुर्यात् ॐ आमंत्रितोस्मीति प्रतिवचनं ॐ अक्रोधनेन शौचपरेण सततं ब्रह्मवादिना भवि
तव्यं भवता च मया च श्राद्धकारिणा ॐ सर्वायासविनिर्मुक्तेन कामक्रोधविवर्जितेन भवितव्यं भवता नः स्वस्तने श्राद्धकर्म
णीति ब्राह्मणं नियमान्श्रावयेत् यद्यविघ्नेन रजनी यास्यति तदा सर्वमेतत्करिष्यामीति तत्प्रतिवचनं ततोग्निसदने प्रातः
श्वेतवस्त्रयुगेन स्नात्वा मध्यंदिने पुनः स्नात्वा कृतनित्यक्रियः श्राद्धकर्ता श्राद्धनिषिद्धेतरवेलायां गोमयोपलिप्तायां तपाक
स्थाने तिलान्विकीर्य परितश्छागं वेष्टयित्वा सपिंडद्वारानूतनभांडैः स्वयं वा पाकमारभेत् श्राद्धभूमिं च पंचगव्येनोपलिप्य ज्व ४६

लदंगारैः संशोध्य गोरमृत्तिकया छागघृततिलैः सर्षपैश्च विकिरेत् द्विजं कारितश्मश्रुनखछेदनमभिगम्य दंतधावनं च ताम्रपात्रे
तैलोद्वर्त्तनान्युपनीय स्नानार्थं दत्त्वा जलं तत्र स्नातं यजमानः सवर्णानाहूतमाचांतं मध्याह्ने शुचिराचांतः शुक्लदिवासउपविश्य
गोमयोपलिप्तायां भूमौ वामावर्त्तेन गोमूत्रमंडलायां ॐ भूम्यै नमः इत्यक्षतपुष्पैस्त्रिरर्चयित्वा भूमौ कुशत्रयमास्तीर्य्य तदुपरि
तिष्ठन् ॐ स्वागतमिति स्थितं ब्राह्मणं पृच्छेत् ॐ सुस्वागतमिति तेनोक्ते ॐ इदं ते पाद्यमिति पाद्यमुपनीय विनीतः सन् पुनः पुन
रभिनंद्य पात्रं ब्राह्मणपादौ प्रक्षालयेत् ततः पुटके अर्घं कृत्वा दक्षिणाभिमुखोपसव्यं कृत्वा मोटकादिकमादायार्घपात्रं च वा
महस्ते कृत्वा ॐ अद्यामुकगोत्र पितरमुकप्रेत सपिंडीकरणश्राद्धे एष पादार्घस्ते मया दीयते तवोपतिष्ठतामिति पादार्घं दद्यात् 43
ततः आचमनीयजलं पात्रस्थमभिनंद्य जानुनी विश्राव्य ॐ इदं ते आचमनीयमित्याचमनीयजलं ब्राह्मणाय दत्त्वा स्वयं पादौ
प्रक्षाल्याचम्य तमाचम्याग्रे कृत्वा श्राद्धदेशमागच्छेत् पूर्वरात्रौ निमंत्रणासंभवे तस्मिन्नेवाह्नि श्राद्धवेलायां पूर्वोक्तविशेषण
विशिष्टं यजमानः सवर्णानाहूतं पूर्ववत्कृतगोमूत्रमंडलायां भूमौ त्रिः पुष्पाक्षतार्चितायां कुशोपरि तिष्ठन् ॐ स्वागतमिति ब्रा
ह्मणं पृच्छेत् ॐ सुस्वागतमिति तेनोक्ते उभावप्युपविशतः ततः श्राद्धकर्त्ता ॐ इदं ते पाद्यमिति पाद्यमुपनीय विनीतः पुनः पु
नरभिनंद्य पात्रं ब्राह्मणपादौ प्रक्षालयेत् ततोपसव्यं कृत्वा पुष्पचंदनतांबूलानि विप्रकरे दत्त्वा ब्राह्मणजानुं दक्षिणहस्तेन
स्पृष्ट्वा ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणश्राद्धकरणाय भवंतं ब्राह्मणमहमामंत्रये इत्यामंत्र्य ॐ आमंत्रि
तोस्मीति तेनोक्ते ॐ अक्रोधनेन शौचपरेणेत्यादिना ॐ सर्वायासविनिर्मुक्तेनेत्यादिना ब्राह्मणं नियमान्श्रावयेत् भवित
व्यमिति तेनोक्ते अर्घं परिकल्प्य वामहस्ते कृत्वा मोटकादिकमादाय ॐ अद्यामुकगोत्र पितरमुकप्रेत सपिंडीकरणश्राद्धे ए
ष पादार्घस्ते मया दीयते तवोपतिष्ठतामिति पादार्घं दद्यात् ॐ ततः आचमनीयजलं पात्रस्थं शिरसाभिवंद्य जानुनी विश्रा

थ ॐ इदं ते आचमनीयमिति ब्राह्मणाय दत्वा सव्येन स्वयं पादौ प्रक्षाल्याचम्याग्रे कृत्वा श्राद्धदेशमागच्छेत् तत्र प्राङ्मुख उपविश्य स्वस्ति
श्रा. हमिति दृष्ट्वा आसनं स्पृष्ट्वा ऽत्रास्यतामिति ब्राह्मणान् उदङ्मुखमुपवेशयेत् द्विजपदयोस्तले कुशान्दद्यात् आसनसमीपे तिलतैलेन दी
दी. पं स्थापयेत् अन्यांश्च प्रत्यासनसमीपे चतुरो दीपान्स्थापयेत् ब्राह्मणेन दीपरक्षा कर्त्तव्या रक्षोघ्नान्गौरसर्षपतिलान्श्राद्ध
२२ देशे संनिधापयेत् काककुक्कुरादीन्श्राद्धभूमौ नप्रसारयेत् ततोऽपवित्रः पवित्रो वेत्यादि पठित्वा ॐ पुंडरीकाक्षः पुनातु इति श्राद्धी
यद्रव्याण्यात्मानं च कुशत्रययजलेन सिंचेत् ततः कुशत्रययतिलजलान्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य प्रेतत्व
विमुक्तिहेतुं षोडशश्राद्धांतर्गतसपिंडीकरणश्राद्धमहं करिष्ये इति संकल्पं कुर्यात् ॐ कुरुष्वेति ब्राह्मणो वदेत् ॐ गायत्रीजप
महं करिष्ये इति ब्राह्मणं पृच्छेत् ॐ कुरुष्वेति तेनानुज्ञातः प्रणवव्याहृतिसहितां गायत्रीं त्रिर्जपेत् ततः ॐ देवताभ्य इति त्रिर्जपे
त् ततो देवश्राद्धार्थोपकल्पितासनादि देशमागत्योदङ्मुख उपविश्य कुशत्रय यव जलान्यादाय ॐ अद्यामुकगोत्रस्य पितुर त्वं
मुकप्रेतस्य सपिंडीकरणनिमित्तकामुकगोत्रपितामहप्रपितामहवृद्धप्रपितामहामुकामुकशर्मश्राद्धसंबंधिनो विश्वेदेवा
इदमासनं वो नमः इति पूर्वाग्रकुशत्रयरूपं सयवजलप्रोक्षितमुत्सृजेत् ततः ॐ विश्वान्देवानहमावाहयिष्ये इत्युक्त्वा ॐ विश्वे
पू देवास आगत शृणुता म इमं हवं इदं बर्हिर्निषीदत इत्यावाह्य ॐ यवोसि यवयास्मद्द्वेषो यवयारातीरिति श्राद्धदेशे यवान्वि
कीर्य ॐ विश्वेदेवाः शृणुतेमं हवं मे ये अंतरिक्षे य उप द्यवि ष्ठ ये ऽग्निजिह्वा उत वा यजत्रा आसद्यास्मिन्बर्हिषि मादयध्वं ॐ आ य
गच्छंतु महाभागा विश्वेदेवा महाबलाः ये यत्र योजिताः श्राद्धे सावधाना भवंतु ते इति पठेत् ततः पुटके पवित्रं धृत्वा ॐ शन्नो
देवीरभिष्टय आपो भवंतु पीतये शंयोरभिस्रवंतु नः इति जलं तत्र क्षिप्त्वा ॐ यवोसि यवयास्मद्द्वेषो यवयारातीरिति तत्र यवा
न्क्षिप्त्वा गंधपुष्पं तूष्णीं तत्र प्रक्षिप्यार्घपात्रं वामहस्ते कृत्वा पवित्रं भोजनपात्रे पूर्वाग्रं धृत्वा तदुपरि किंचिदुदकांतरं दत्वा ॐ या ग
दिव्या आपः पयसा इति पठित्वा कुशत्रययवजलान्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तकामु ५१
३

ए ह्व स्वधा वो नमः ॐ विश्वेभ्यो देवेभ्य एष स्थान मसि इति देवार्घपात्रं उत्तानमेव धारयेत्। ॐ अद्यामुकगोत्रस्य
कगोत्रपितामहप्रपितामहरुद्ररुद्रप्रपितामहामुकामुकशर्मश्राद्धसंबंधिनो विश्वेदेवा एतानि गंधपुष्पधूपदीपतांबूलयज्ञो
पवीतवासांसि वो नमः इति गंधादीनुत्सृजेत् ततो भोजनपात्रासनयोश्चतुर्दिक्षु जलेन चतुष्कोणमंडलं कृत्वा अपसव्येन मोट
कादिकमादाय तिलघृतव्यंजनयुतमन्नं ॐ इदमन्नमेतद्भूस्वामिपितृभ्यो नमः इति दक्षिणामुखमुत्सृजेत् ततः सव्यं कृत्वा ता
म्रपात्रादिकं गृहीत्वा तेनान्नमादाय मनाक् स्थित्वा देवान्ध्यायन् पात्रे परिवेष्यात् व्यंजनानि घृतं जलं च तत्रोपनीयान्नोपरि
मधु दत्वा ॐ मधुवाता इति तिसृभिः मधु मधु मध्विति मंत्रैरन्नमभिमंत्रयेत् ततः स्वजुहस्ताभ्यामन्नपात्रमालभ्य ॐ पृथिवी ते पात्रं
इत्यादि ॐ इदं विष्णुर्विचक्रमे इत्यादि च पठित्वा ॐ कृष्ण कव्यमिदं रक्षस्व मदीयमिति पठित्वा ॐ इदमन्नमित्यन्ने ॐ इमा आपः इति
जले ॐ इदमाज्यमिति घृते ॐ इदं हविरिति पुनरन्ने दक्षिणांगुष्ठमावेश्य ॐ यवोसि इत्यादिनान्नोपरि यवान्निक्षिप्य कुश
यवजलान्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तकामुकगोत्रपितामहप्रपितामहरुद्ररुद्रप्रपि
तामहामुकामुकशर्मश्राद्धसंबंधिनो विश्वेदेवा एतद्वोन्नं सोपकरणं नमः इत्यन्नमुत्सृजेत् एवं देवकांडे निर्वर्त्य हस्तौ प्रक्षा
गदै ल्य कुश यव उदकादिकं पुनर्गृहीत्वा प्रेतश्राद्धदेशमागत्योपविश्य अपसव्यादि कृत्वा दक्षिणाभिमुखो मोटकादीन्यादाय ॐ
अद्यामुकगोत्रामुकप्रेतसपिंडीकरणश्राद्धे इदमासनं ते मया दीयते तवोपतिष्ठतामिति पित्रे आसनं मोटकरूपं तिलजलप्रो
क्षितमुत्सृजेत् पुनर्मोटकादिकमादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तकश्राद्धे ऽमुकगोत्र
पितामहामुकशर्मन्निदमासनं ते स्वधा इति स्थानत्रये ऽत्र प्रासनेषु सर्वपश्चिमस्थाने स्थितमासनं पितामहायोत्सृजेत्
पुनर्मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तकश्राद्धे ऽमुकगोत्रप्रपितामहामुकश
र्मन्निदमासनं ते स्वधा इति मध्यममासनं प्रपितामहायोत्सृजेत् पुनर्मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुक
प्रेतस्य सपिंडीकरणनिमित्तकश्राद्धे ऽमुकगोत्ररुद्ररुद्रप्रपितामहामुकशर्मन्निदमासनं ते स्वधा इति सर्वपूर्वमासनं रुद्ररुप्र

पितामहायोत्सृजेत् ततः पितामहादीनुद्दिश्य ॐ पितॄनह मावाहयिष्येइत्युक्त्वा ॐ उशंतस्त्वा निधीमह्युशन्तः समधीमहि उशन्नु
शत आवाहपितॄन्हविषेअत्तवेइति पितामहादीनावाह्य ॐ अपहताअसुराइत्युभयत्र श्राद्धस्थाने तिलान्विकीर्य्य ॐ आयंतुनः
श्रा. दी. २२ पितरः इति मंत्रं जपेत् ततोऽर्घपात्रचतुष्टयेऽनवच्छिन्नं दक्षिणाग्रं पवित्रं प्रत्येकं धृत्वा ॐ शन्नोदेवीरिति प्रत्येकं जलं क्षिप्त्वा ॐ
तिलोसीति स्वाहांतेन मंत्रेण प्रत्येकं तेष्वेव तिलान्प्रक्षिप्य गंधपुष्पे तेष्वेव तत्समीपे प्रक्षिप्य प्रेतार्घपात्रं वामहस्ते कृत्वा ॐ यादि
व्या आपइत्यादि मंत्रं जपित्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्र पितरमुकप्रेत सपिंडीकरणश्राद्धे एषहस्तार्घस्ते मयादी
यते तवोपतिष्टतामिति पात्रव्राह्मणहस्तस्थपवित्रोपरि अर्घजलं दद्युत्सृजेत् अवशिष्टजलसहितार्घपात्रं ब्राह्मणाग्रे नि
दध्यात् पितामहार्घपात्रं वामहस्ते कृत्वा पवित्रं भोजनपात्रे धृत्वा तदुपरि जलांतरं दत्वा ॐ यादिव्याइत्यादि पठित्वा मोटकादी
न्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तकश्राद्धेऽमुकगोत्र पितामहामुकशर्मन् एषतेहस्ता
र्घः स्वधा इति पूर्ववदर्घं दद्यात् अवशिष्टजलयुतमर्घपात्रमग्रे धारयेत् ततः प्रपितामहार्घपात्रं वामहस्ते कृत्वा पवित्रं भोज
नपात्रे धृत्वा तदुपरि जलांतरं दत्वा ॐ यादिव्याइत्यादि पठित्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य स
पिंडीकरणनिमित्तकश्राद्धेऽमुकगोत्रप्रपितामहामुकशर्मन्नेष तेहस्तार्घः स्वधेत्यर्घं दद्यात् पूर्ववदुत्सृजेत् तदर्घपात्रमव
शिष्टजलयुतमग्रे स्थापयेत् तृतीयार्घपात्रं वामहस्ते कृत्वा पवित्रं भोजनपात्रे धृत्वा तदुपरि जलांतरं दत्वा ॐ यादिव्या इत्या
नमित्तके दिपठित्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणश्राद्धेऽमुकं रुद्रप्रपितामहामुकश गोत्रे
र्मन्नेषहस्तार्घः स्वधेति पूर्ववदुत्सृजेत् अवशिष्टजलयुतमर्घपात्रमग्रे स्थापयेत् ततः सव्यं कृत्वा चम्यापसव्यं कृत्वा
मोटकत्रयमग्रे धृत्वा प्रेतार्घपात्रं गृहीत्वा ॐ येसमानाः सुमनसः पितरो यमराज्ये तेषांलोकः स्वधानमो यज्ञो देवेषुक
ल्पतां येसमानाः सुमनसो जीवा जीवेषु मामकाः तेषां श्रीर्मयि कल्पतामस्मिँल्लोके शतंसमाः इति मंत्राभ्यां प्रेतार्घपात्र ४८

स्यत्तृतीयभागजलं पुटकांतरे धृत्वा पुनरपि मंत्रद्वयं पठित्वाऽपरतृतीयभागं पुटकांतरे धृत्वा. प्रेतार्घपात्रस्यत्तृतीयभाग
जलं पुटकांतरे तू हमी धृत्वा प्रथमपुटकस्य विभक्तजलत्तृतीयभागं प्रेतार्घपात्रे कृत्वा पवित्रपुष्पसहितप्रेतार्घपात्रमादाय ॐ
ये समाना इति मंत्रद्वयेन प्रेतार्घपात्रस्यत्तृतीयभागजलं पितामहार्घपात्रस्य जले मेलयेत् एवमपरपुटकद्वयस्थितार्घत्तृतीय
भागद्वयं क्रमेण प्रत्येकं प्रेतार्घपात्रे कृत्वा प्रत्येकं मंत्रद्वयं पठित्वा प्रपितामहार्घपात्रस्य जले तृ प्रपितामहार्घपात्रस्य जले क्र
मेण मेलयेत् ततः प्रेतार्घपात्रं पात्रब्राह्मण वामपार्श्वे ॐ पित्रे स्थानमसीति न्युब्जीकृत्वा स्थापयेत् एवं स्थापितमर्घपात्रं च
तुष्टयं दक्षिणापर्यंतं न चालयेत् ततो मोटकादिकमादाय ॐ अद्यामुकगोत्र पितरमुकप्रेत सपिंडीकरण श्राद्धे एतानि गंध
पुष्पधूपदीपतांबूलयज्ञोपवीतवासांसि ते मया दीयते तवोपतिष्ठतामिति पित्रे गंधादीनि दद्यात् पुनर्मोटकमादाय ॐ अद्यामु
कगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तक श्राद्धेऽमुकगोत्र पितामहामुकशर्मन्नेतानि गंधपुष्पधूपदीपतांबूल
यज्ञोपवीतवासांसि ते स्वधेति पितामहाय गंधादीनुत्सृजेत् पुनर्मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेत
स्य सपिंडीकरणनिमित्तक श्राद्धेऽमुकगोत्र तृ प्रपितामहामुकशर्मन्नेतानि गंधपुष्पधूपदीपतांबूलयज्ञोपवीतवासांसि
ते स्वधेति तृ प्रपितामहाय गंधादीनुत्सृजेत् ततः पितृपात्रब्राह्मणहस्ते स्वहस्तेन ॐ एष गंधः इति चंदनं निवेदयेत् ॐ सु
गंध इति तेनोक्ते ॐ एतानि पुष्पाणीति पुष्पाणि निवेदयेत् ॐ सुपुष्पाणीति तेनोक्ते ॐ एष धूप इति धूपं निवेदयेत् ॐ सुधूप
इति तेनोक्ते एष दीप इति निवेदयेत् ॐ सुदीप इति तेनोक्ते ॐ एतानि तांबूलानि इति निवेदयेत् ॐ सुतांबूलानीति तेनोक्ते ॐ इमे
यज्ञोपवीते इति निवेदिते ॐ सुयज्ञोपवीत इति प्रत्युक्ते ॐ एतानि वासांसीति निवेदयेत् ॐ सुवासांसीति ब्राह्मणो वदेत् पुष्पा
णि शिखातिरिक्तस्थानेन धारयेत् ततः पात्रब्राह्मणचतुर्दिक्षु चतुष्कोणमंडलं जलेन कुर्यात् अपरं पितामहादित्रिकोण
चतुष्कोणं मंडलं कुर्यात् ततः सव्यं कृत्वा प्राङ्मुख उपविश्य उपवीती पातितदक्षिणजानुस्तान्यपात्रादौ व्यंजनं द्वारवर्जितं स
महार्घपात्रे धृत्वा पात्रत्रयमेकदैव पितामहासनवामपार्श्वे ॐ पितृभ्यः स्थानमसीति न्युब्जीकृत्वा स्थापयेत् १२

श्रा॰ श्री॰ २४

घृतमन्नं कृत्वा पुटकादिस्थजलेन हस्तेन ॐ अग्नये कव्यवाहनाय स्वाहा ॐ सोमाय पितृमते स्वाहा इत्याहुतद्वयं तदन्नं
वज्जुहुयात् ततोपसव्यं कृत्वाऽवशिष्टमन्नं पितामहादिपात्रे किंचित्किंचिद्दद्यात् पिंडार्थं चावशेषयेत् ततो हस्ताभ्यां ताम्र
पात्रमादाय तेनान्नं गृहीत्वा प्रेतपात्रे ध्यायन् परिविष्यात् पृथक् पुटकादिस्थितानि घृतजलव्यंजनानि चोपनयेत् ततः
स्तेनैव क्रमेण पितामहादिपात्रत्रये प्रत्येकमन्नादि परिवेषणं कुर्यात् ततः प्रेतपात्रादिस्थितान्नेषु प्रत्येकं मधु दद्यात्
ततः प्रत्येकमन्नमभिमंत्रयेत् ॐ मधुवाता ऋतायते मधुक्षरंति सिंधवः माध्वीर्नः संत्वोषधीः मधुनक्तमुतोषसो मधु
मत्पार्थिवं रजः मधु द्यौरस्तु नः पिता मधुमान्नो वनस्पतिर्मधुमानस्तु सूर्यः माध्वीर्गावो भवंतु नः ॐ मधु मधु मध्विति मं
त्रैः ततः प्रेतान्नपात्रं व्यस्ताभ्यां न्युब्जाभ्यां हस्ताभ्यामालभ्य ॐ पृथिवीते पात्रं इति ॐ इदं विष्णुर्विचक्रमे इति जपित्वा ॐ
कृष्णकव्यमिदं रक्ष मदीयमित्युक्त्वा पात्रस्य दक्षिणहस्तांगुष्ठं गृहीत्वा ॐ इदमन्नं ॐ इमा आपः ॐ इदमाज्यं ॐ इदं हवि
रिति क्रमेणान्नजलघृतान्नेषु तं प्रक्षिप्य मोटकादीन्यादाय ॐ अद्यामुकगोत्र पितरमुकप्रेत सपिंडीकरणश्राद्धे इ
दमन्नं सोपकरणं ते मया दीयते तवोपतिष्ठतामिति पित्रेऽन्नमुत्सृजेत् अनेनैव क्रमेण पितामहान्नपात्रमालभ्य ॐ पृथि
वीते इत्यादि जपित्वा ॐ इदमन्नं इत्यादि स्वदक्षिणहस्तांगुष्ठनिवेशनं कृत्वा ॐ अपहता इत्यादिना तिलानन्ने विकीर्य
मोटकादीन्यादाय ॐ अमुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तकश्राद्धेऽमुकगोत्र पितामहामुकशर्म
न्नेतत्तेऽन्नं सोपकरणं स्वधेति पितामहायान्नमुत्सृजेत् ततः प्रपितामहान्नपात्रमालभ्य पूर्ववत् ॐ पृथिवीत्यादिकं
सर्वं कृत्वा मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तकश्राद्धेऽमुकगोत्रप्रपि
तामहामुकशर्मन्नेतत्तेऽन्नं सोपकरणं ते स्वधेति प्रपितामहायान्नमुत्सृजेत् ततो वृद्धप्रपितामहान्नपात्रमालभ्य पू
र्ववत् ॐ पृथिवीते इत्यादिकं सर्वं कृत्वा ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तकश्राद्धेऽमुकगोत्र ४५

निवेश्य ॐ अपहता इत्यन्नोपरि प्रचुर
तिलान् ९

वृद्धप्रपितामहामुकशर्म्मन्नेतत्तेन्नं सोपकरणं स्वधेति वृद्धप्रपितामहायान्नमुत्सृजेत् ततः ओं भवान्प्राशयत्विति पात्र
ब्राह्मणाय जलचुलकं दत्वा सप्रणवव्याहृतिकां गायत्रीं ओं मधुवाता इत्यादि स्त्र्यृचं ओं मधु मधु मध्विति च जपित्वा ओं अन्न
हीनमित्यादि च पठित्वा ओं यथासुखं जुषस्वेति पात्रं ब्राह्मणं प्रति ब्रूयात् स च ओंकारपूर्वं वामेन पाणिना पात्रमत्यज
न्चुलकं गृहीत्वा भुंजीत हासक्रोधत्वरादिकं न कुर्यात् व्यंजनार्थं हस्तादिनापि संज्ञां न कुर्यात् श्राद्धकर्त्ता दर्भेष्वा
सीनः सप्रणवव्याहृतिकां गायत्रीं ओं मधुवाता इत्यादि स्त्र्यृचं ओं मधु मधु मध्विति च जपेत् गायत्रीं ब्राह्मणाननुश्राव्य
ओं कृणुष्व पाज इत्यादीन् रक्षोघ्नमंत्रान् पठित्वा भूमिं तिलैरास्तीर्य्य आच्छाद्य ब्राह्मणान् पितृरूपतया ध्यात्वा ओं उदीरतामि ४९
त्यादि पितृमंत्रान् ओं सहस्रशीर्षा इत्यादि पुरुषसूक्तं ओं आशुः शिशानो इत्यादिकं यथाशक्ति जपेत् ओं नमस्तुभ्यं वि
नृपाद्य इति श्लोकमपि पठेत् वीणादिध्वनिभिर्ब्राह्मणान् हर्षयन् व्यंजनगुणान् इदमन्नमित्यादिक्रमेण कीर्तयन् यत्र य
त्रेच्छोपलभ्येत तत्तदन्नं भोजयेत् ततस्तृप्तान् ब्राह्मणान् ज्ञात्वा पितामहपात्रसंनिधावास्तृतदक्षिणाग्रकुशत्रयां भूमिं प्रो
क्ष्य सर्वप्रकारकमन्नमादाय सतिलघृतजलेनाप्लाव्य ओं अग्निदग्धा इत्यादिना आस्तृतकुशोपरि तदन्नं विकिरेत् ततः
सव्यं कृत्वाचम्य हरिं स्मृत्वाऽपसव्येन पात्रं ब्राह्मणाय ओं इदं ते प्रत्यपोशानमिति गंडूषं दत्वा ओं स्वदितमिति पृष्ट्वा ओं सु
स्वदितमिति तेनोक्ते ओं पिंडमहं करिष्ये इति तं पृच्छेत् ओं कुरुष्वेत्यनुज्ञातः पात्रं ब्राह्मणायाचमनार्थं पात्रं दापयेत् त
तः प्रेतपिंडदानार्थमेकामपरां पितृमहादित्रिकपिंडदानार्थमेकहस्तमितां चतुरंगुलोच्छ्रितां सैकतीं दक्षिणाप्लवां पिंडि
कां निर्माय तन्मध्ये वामेन पाणिना दर्भपिंजलीं गृहीत्वा दक्षिणा[illegible]ते कृत्वा तन्मूलेन सव्योपगृहीतदक्षिणपाणिना ओं अ
पहता इत्यादि पठित्वा दक्षिणाग्रां रेखां प्रादेशमात्रामसकृदुल्लिख्य दर्भपिंजलीमुत्तरस्यां दिशि क्षिपेत् एवमेवापरपिंडि
कायामप्येकां रेखां कुर्यात् ततः पूर्वपिंडिकारेखोपरि ओं ये रूपाणि प्रतिमुंचमाना इति मंत्रेणांगारं भ्रामयित्वा दक्षिणतः क्षिपेत्
ग

एवमेवापररेखायामंगारंभ्रामयेत् ततउभयत्ररेखायामुपमूलसकृच्छूनान्दक्षिणाग्रान्कुशान्स्तृणुयात् ततःसव्यंकृत्वा ॐ
श्रा॰ देवतास्यइतित्रिर्जपेत् ततोपसव्यंकृत्वापुटकचतुष्टयेजलतिलगंधपुष्पाणिकृत्वाएकंपुटकंवामहस्तेकृत्वामोटकादी 50
ष्ठो॰ न्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रेतसपिंडीकरणश्राद्धपिंडस्थानेऽत्रावनेनिक्ष्वतेमयादीयतेतवोपतिष्ठतामितिपू
२५ र्वपिंडिकायांछिन्नमूलोपरिअवनेजनंदद्यात् ततोपरंपुटकंवामहस्तेकृत्वामोटकादीन्यादाय ॐ अद्यामुकगोत्रस्य
पितुरमुकप्रेतस्यसपिंडीकरणनिमित्तकश्राद्धपिंडस्थानेऽमुकगोत्रपितामहामुकशर्मन्नत्रावनेनिक्ष्वतेस्वधेतिद्विती
यपिंडिकायामास्तृतकुशमूलसंनिधानेपितामहायावनेजनजलंदद्यात् ततोपरंपुटकंवामहस्तेकृत्वादक्षिणहस्ते
नमोटकादीन्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यसपिंडीकरणनिमित्तकश्राद्धपिंडस्थानेऽमुकगोत्रंपिताम प्र
हामुकशर्मन्नत्रावनेनिक्ष्वतेस्वधेतिआस्तृतकुशमध्येप्रपितामहायावनेजनंदद्यात् ततोपरंपुटकंवामहस्तेकृत्वामोट
कादीन्यादाय ॐ अद्यामुकगोत्रपितुरमुकप्रेतस्यसपिंडीकरणनिमित्तकश्राद्धपिंडस्थानेऽमुकगोत्रवृद्धप्रपितामहा
मुकशर्मन्नत्रावनेनिक्ष्वतेस्वधेतिआस्तृतकुशाग्रेवृद्धप्रपितामहायावनेजनंदद्यात् ततोदक्षिणहस्तेनमोटकतिल
जलपिंडानादाय ॐ अद्यामुकगोत्रपितरमुकप्रेतसपिंडीकरणश्राद्धेएषपिंडस्तेमयादीयतेतवोपतिष्ठतामितिपूर्वपिं
डिकायांकुशोपरिपित्रेपिंडंदद्यात् पुनर्मोटकादीनिपिंडंचादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यसपिंडीकर
णनिमित्तकश्राद्धेऽमुकगोत्रपितामहामुकशर्मन्नेषतेपिंडःस्वधेतिद्वितीयपिंडिकायांप्रथमावनेजनस्थानेपिताम
हायपिंडंदद्यात् पुनर्मोटकादीनिपिंडंचादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यसपिंडीकरणनिमित्तकश्राद्धेऽ
मुकगोत्रप्रपितामहामुकशर्मन्नेषतेपिंडःस्वधेतिप्रपितामहायापरावनेजनस्थानेपिंडंदद्यात् पुनर्मोटकादीनि
पिंडंचादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यसपिंडीकरणनिमित्तकश्राद्धेऽमुकगोत्रवृद्धप्रपितामहामुकश ५०

मन्नेषतेपिंडः स्वधेतिवृद्ध प्रपितामहायापरावनेजनस्थानेपिंडंदद्यात् ततः पितामहादिपिंडास्तरणकुशमूले ॐ ले॰
पभागभुजस्तृप्यंत्वितिकरंप्रोंच्यसव्यंकृत्वाचम्यहरिंस्मरेत् ततोपसव्यंकृत्वादक्षिणाभिमुखः पितरमुद्दिश्य ॐ अत्र॰
पितामादयस्व यथाभागमावृषायस्वेतिपठित्वा उत्तराभिमुखोभूत्वाश्वासंनियम्य भासुरमूर्तिं पितरं ध्यायन् मुखंदक्षिणां
दिशंप्रत्यावर्त्तयन् ॐ अमीमदंतपितायथाभागमावृषायिषेतिपठेत् ततः पितामहादीनुद्दिश्यदक्षिणाभिमुखः ॐ अत्रपि
तरोमादयध्वंयथाभागमावृषायध्वमितिपठित्वा उत्तराभिमुखोभूत्वाश्वासंनियम्यतुष्टान्भासुरमूर्तीन्पितॄन्ध्यायन्मु
खंप्रत्यावर्त्तयन् ॐ अमीमदंतपितरोयथाभागमावृषायिषेतिपठेत् ततः प्रेतावनेजनपात्रंवामहस्तेकृत्वामोटकादीन्याद
य ॐ अद्यामुकगोत्रपितरमुकप्रेतसपिंडीकरणश्राद्धपिंडे॰ त्रप्रत्यवनेनिक्ष्वतेमयादीयतेतवोपतिष्ठतामितिपित्रेप्रत्यवने
जनंदत्वा पितामहावनेजनपात्रंवामहस्तेकृत्वामोटकादीन्यादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यसपिंडीकरण
निमित्तकश्राद्धपिंडे॰ मुकगोत्रपितामहामुकशर्मन्नत्रप्रत्यवनेनिक्ष्वतेस्वधेतिपितामहायप्रत्यवनेजनंदत्वा प्रपिताम
हावनेजनपात्रंगृहीत्वामोटकादीनिचादाय ॐ अद्यामुकगोत्रस्यपितुरमुकप्रेतस्यसपिंडीकरणनिमित्तकश्राद्धपिंडे॰
मुकगोत्रप्रपितामहामुकशर्मन्नत्रप्रत्यवनेनिक्ष्वतेस्वधेतिप्रपितामहायप्रत्यवनेजनंदद्यात् ततोवशिष्टंपुटकमादाय
मोटकादीनिचादाय ॐ अद्यामुकगोत्रस्यपि[illegible]मुकप्रेतस्यसपिंडीकरणनिमित्तकश्राद्धपिंडे॰ मुकगोत्रवृद्धप्रपिताम
हामुकशर्मन्नत्रप्रत्यवनेनिक्ष्वतेस्वधेतिवृद्धप्रपितामहायप्रत्यवनेजनंदद्यात् ततोनीवीविस्रंसनस्यसव्यंकृत्वाचम्यहरिं
स्मृत्वाऽपसव्यंकृत्वावामेनपाणिनाधृतंसूत्रंदक्षिणेनादाय ॐ एतद्वःपितरोवासः इत्युभाभ्यांहस्ताभ्यांपितृपिंडोपरिसूत्रंधा
रयेत् पूर्ववत्पुनःसूत्रमादाय ॐ नमोवः पितरोरसायनमोवः पितरः शोषाय नमोवः पितरोजीवाय नमोवः पितरः स्व

श्रा॰
श्री॰
२६

धायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्नः पितरो दत्त सतो वः पितरो देष्म ॐ
एतद्वः पितरो वासः इति मंत्रं पठित्वा प्रत्येकपिंडोपरि सूत्रं धारयेत् ततो मोटकादीन्यादाय ॐ अद्यामुकगोत्रपितरमुकप्रे
तसपिंडीकरणश्राद्धपिंडे एतद्वाससूत्रं मयादीयते तेन वो पतिष्ठतामिति पित्रे सूत्रमुत्सृजेत् पुनर्मोटकादीन्यादाय ॐ अद्या
मुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तकश्राद्धपिंडे ऽमुकगोत्र पितामहामुकशर्मन्नेतत्ते वासः स्वधेति सू
त्रं पितामहायोत्सृजेत् पुनर्मोटकादीन्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तकश्राद्ध
पिंडे ऽमुकगोत्र प्रपितामहामुकशर्मन्नेतत्ते वासः स्वधेति प्रपितामहाय सूत्रं समुत्सृजेत् पुनर्मोटकादीन्यादाय
ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तकश्राद्धपिंडे ऽमुकगोत्रवृद्धप्रपितामहामुकशर्मन्नेत
त्ते वासः स्वधेति वृद्धप्रपितामहाय सूत्रमुत्सृजेत् ततः प्रत्येकं पितृपिंडादिषु गंधपुष्पधूपदीपतांबूलानि दद्यात् ॥
ततः पिंडसमीपे तत्तत्पिंडशेषान्नं विकिरेत् ततः पिंडेषु सूत्रादिकमपनीय हस्तद्वयेन सुवर्णारजतकुशानादाय ॐ ये
समानाः सुमनसः पितरो यमराज्ये तेषां लोकः स्वधा नमो यज्ञो देवेषु कल्पतां ये समानाः सुमनसो जीवा जीवेषु मा
मकाः तेषां श्रीर्मयि कल्पतामस्मिंल्लोके शतं समा इति मंत्रद्वयं पठित्वा प्रेतपिंडं त्रिधा विभजेत् वारद्वयं मंत्रपाठः त
तः प्रथमपिंडभागमादाय ॐ ये समाना इति मंत्रद्वयेन पितामहपिंडे योजयेत् एवं द्वितीयपिंडभागमादाय मंत्रद्व
येन प्रपितामहपिंडे योजयेत् तृतीयपिंडभागमादाय मंत्रद्वयेन वृद्धप्रपितामहपिंडे योजयेत् ततः प्रेतभागेन सह पिं
डत्रयं प्रत्येकमेकीकृत्य समं वर्तुलं कुर्य्यात् ततः प्रेतपूर्वकं पितामहादीनुद्दिश्य पिंडत्रये ऽर्घ्यपुष्पधूपदीपतांबूला
नि दद्यात् ततः सव्येन देवान्नपात्रे ॐ शिवा आपः संत्विति जलं दद्यात् अपसव्येन पितृब्राह्मणहस्ते पूर्वमंत्रेण जलं द
द्यात् ॐ संत्विति तत्प्रतिवचनं ततः पितामहान्नपात्रेषु प्रत्येकं जलं दद्यात् अनेनैव क्रमेण ॐ सौमनस्यमस्त्विति सव्या ५२

ऽपसव्याभ्यां पुष्पदानं ॐ अस्त्विति ब्राह्मणप्रतिवचनं सव्येन ॐ अक्षतंचारिष्टमस्त्विति तंडुलप्रक्षेपो देवान्नपात्रे ततोपसव्ये
न प्रेतश्राद्ध पात्र ब्राह्मणाकरे ॐ अक्षतंचारिष्टमस्त्विति तंडुलप्रक्षेपः ॐ अस्त्विति प्रतिवचनं त्रिकेपि प्रत्येकं ततो मोदकादी
न्यादाय ॐ अद्यामुक गोत्रस्य पितुरमुक प्रेतस्य सपिंडीकरणश्राद्धे दत्तैतदन्नपानादिकमुपतिष्ठतामिति पितुरक्षय्योदकं
पात्रब्राह्मणाकरे उत्सृजेत ॐ उपतिष्ठतामिति प्रतिवचनं पुनर्मोदकादीन्यादाय ॐ अद्यामुक गोत्रस्य पितुरमुक प्रेतस्य स
पिंडीकरणनिमित्तक श्राद्धेऽमुक गोत्रस्य वृद्धप्रपितामहस्यामुकशर्मणो दत्तैतदन्नपानादिकमक्षय्यमस्त्विति वृद्धप्र
पितामहायाक्षय्योदकं दद्यात् ततः सव्यं कृत्वाकृतांजलिस्तन्मनाः सुमना दक्षिणां दिशं पश्यन् ॐ अघोराः पितरः संत्वि
ति पितामहादिषु पिंडत्रयोपरि पूर्वाग्रां जलधारां दद्यात् ॐ संत्विति ब्राह्मणप्रतिवचनं अत्र वारिधारादानमाचारात् अन्यथा
तु पाठमात्रं ततः प्राङ्मुखः गोत्रं नो वर्द्धतामिति पठेत् ॐ वर्द्धतामिति प्रतिवचनं ॐ दातारो नोभिवर्द्धंतां वेदाः संततिरेव च ।
श्रद्धा च नो माव्यगमद्बहुदेयं च नोऽस्तु अन्नं च नो बहु भवेदतिथींश्च लभेमहि याचितारश्च नः संतु मा च याचिष्म कंचन
एताः सत्याशिषः संत्विति याचेत् ॐ संत्विति प्रतिवचनं ततोपसव्यं कृत्वा पिंडोपरि सपवित्र कुशत्रयं दक्षिणाग्रमास्तीर्य
ॐ पित्र्ये नमो वाचयिष्ये इति ब्राह्मणं ब्रूयात ॐ वाच्यतामित्यनुज्ञातः ॐ पित्र्ये नम उच्यतामिति ब्राह्मणं ब्रूयात् ॐ मस्तु नम इ
ति ब्राह्मणो वदेत् ततो वामहस्तोज्झितं जलपात्रं दक्षिणेनादाय ॐ ऊर्ज्जं वहंतीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्थ
तर्पयत मे पितॄनिति पित्र्यानुद्दिश्यपसपवित्रकुशोपरि दक्षिणायां जलधारां दद्यात् ततो नम्रीभूय पिंडानाघ्रायोत्थापयेत् पिं
डाधारकुशानुल्मुकं च वह्नौ क्षिपेत् सव्येन देवार्घपात्रं संचाल्यापसव्येन पित्र्यार्घपात्राणि पुत्तानीकृत्य दक्षिणां दद्यात्
तत्र सव्येन कुशत्रययवजलदक्षिणाद्रव्याण्यादाय ॐ अद्यामुकगोत्रस्य पितुरमुक प्रेतस्य सपिंडीकरणनिमित्तकामुक
गोत्रपितामहप्रपितामहवृद्धप्रपितामहामुकामुकशर्मश्राद्धसंबंधिनो विश्वेषां देवानां कृतैतच्छ्राद्धप्रतिष्ठार्थमिदं दहिरण्य

एवं पितामहप्रपितामहयोरपि दातव्यं ॥

श्रा॰
प्री॰
२७

मग्निदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इति प्राङ्मुख उत्सृजेत् ततोऽपसव्यं कृत्वा दक्षिणाभिमुखो
मोटकतिलजलान्यादाय दक्षिणाद्रव्यं चादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य कृते तत्स पिंडीकरणश्राद्ध प्रतिष्ठा
र्थमिदं रजतं चंद्रदैवतममुकगोत्रायामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति दक्षिणां पितृब्राह्मणकरे द-
द्यात् ॐ स्वस्तीति प्रतिवचनं पुनस्तथैव दक्षिणाद्रव्यादिकमादाय ॐ अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीक
रणनिमित्तकश्राद्धे कृते तदमुकगोत्र पितामहामुकशर्म प्रतिष्ठार्थमिदं रजतं चंद्रदैवतं यथानामगोत्राय ब्राह्मणाय द
क्षिणां तुभ्यमहं समुत्सृजे इति पितामहश्राद्धे दक्षिणां दद्यात् पुनर्दक्षिणाद्रव्यादिकमादाय ॐ अद्यामुकगोत्रस्य पितु
रमुकप्रेतस्य सपिंडीकरणनिमित्तक कृते तदमुकगोत्र प्रपितामहामुकशर्म श्राद्ध प्रतिष्ठार्थमिदं रजतं चंद्रदैवतं यथा
नामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इति प्रपितामहश्राद्धदक्षिणां दद्यात् पुनर्दक्षिणाद्रव्यादिकमादाय ॐ
अद्यामुकगोत्रस्य पितुरमुकप्रेतस्य सपिंडीकरणनिमित्तक कृते तदमुकगोत्रश्राद्ध प्रपितामहामुकशर्म श्राद्ध प्रतिष्ठार्थ
मिदं रजतं चंद्रदैवतं यथानामगोत्राय ब्राह्मणाय दक्षिणां दातुमहमुत्सृजे इतिवृद्ध प्रपितामहश्राद्धदक्षिणां दद्यात् ततः
सव्यं कृत्वा ॐ विश्वेदेवाः प्रीयंतामिति देवविसर्जनं कृत्वापसव्यं कृत्वा पितृश्राद्ध ब्राह्मणं ॐ निरोंकारं स्वस्ति ब्रूहीति व
देत् स्वस्तीति तेनोक्ते स्वस्त्यस्त्विति पितृब्राह्मणं विसृज्य गृहीत पितृब्राह्मणांगुष्ठो गृहीतोदकपात्रो वहिर्निमंत्रणस्था
नमागत्य ब्राह्मणं स्थापयित्वा ॐ आमा वाजस्य प्रसवो जगम्यादेमे द्यावापृथिवी विश्वरूपे आमागन्तां पितरा मातरा चामा
सो मो अमृतत्वेन गम्यादिति प्रदक्षिणां कुर्वन् उदकधारया त्रिर्वेष्टयेत् ततः प्रणम्याङ्गुष्ठो पादानानुव्रज्य प्रदक्षिणीकृत्याभि
वादयेत् ततः सव्यं कृत्वा ॐ देवताभ्य इति त्रिर्जपेत् ततो गृहं प्रविश्य सव्यापसव्याभ्यां देवपितृश्राद्धदीपान् पाणिभ्यां नि
र्वापयेत् ततः सव्येन पाणिना पादप्रक्षालनमाचमनं च कुर्यात् ततः ॐ प्रमादादित्यादि पठित्वा एतत्फलकामो विष्णुं स्मरेत् ५२

1

श्रीब्रह्मचारि
रघुनाथजि

श्रीगणेशाय नमः ॥ बाहू द्वौ च मृणालमास्यकमलं लावण्यलीलाजलं श्रोणीतीर्थशि
लाचनेत्रसफरीधम्मिल्लशैवालयं कांतायास्तनचक्रवालकं कांतायास्तनचक्रवाकयुगलं कं
दर्पबाणानले दग्धानामवगाहनाय विधिना रम्यं सरोनिर्मितं ॥ छायातामधुपाभिलीयदि
पुनर्नो यान्तरवं मधुः आरामा यान्तु विभावतो यदि पुनर्जन्मग्रहं प्रार्थये व्याधःकोकिलबंधने
विधुप विध्वंसे वराहुर्ग्रहः कंदर्पहरनेत्रदीधितिरिवं प्राणेश्वरे मन्मथ २ इंदीवरेणानय
नं मुखमम्बुजेन कुंदेन दंतमधरं नवपल्लवेन अंगानि चंपकदलैस्स विधाय वेधाः कांते धाता
कथं घटितवानुपलेन चेतः ॥ एको हि खंजनवरो नलिनीदलस्थो दृष्टः करोति चतुरंग
चलित =

मां॰

सरुसामवंतिकवयः॰

वलाधिपत्यं किम्मेकारिष्यतितित्तवद्वन्दारविंदेजाना नि नोन यनरवञ्जनङासमेनत ४

येयेरवञ्जनमेकमेवकमलंपश्यंति दे वानुकृविनेसर्वेकवयोभवंतिसुतसांत्रख्यातभूमेभु

जः त्वद्धक्राम्बुजनेत्ररवञ्जनयुगंपश्यंतिये वेजनास्ते तेमन्मथवाणजालविकलामुग्धे

किमितद्भुतं ५ स्तदितिसविधयोगेहंसावहिहिप्तकांतेयसनसमयवेला वर्ततेशीतरश्मेः न

वमुखमकलंकं कीस्तनूनंसराकृयसतितवमुखेंदुंपूर्णचंद्रंविहाय॰ ६ कस्तूरीवरपत्रभङ्ग

निकरोभ्रष्टोनगराडस्थलेनोलुप्तंसाक्विंदनंस्तनतटेधौतन्नने नांजनं त्वगोनस्रपालि

नस्तवाधरदृढेतांबुलसम्वर्द्धितः किंहस्तासिगजेंद्रमंदगमनेनेकिंम्वासिशुस्तेपतिः

वाले चंद्रविंवं॰

२ समायातेकान्तेकथमपिचकालेनबहुनाकथाभिर्देशानांसखिरजनिरर्द्धंगतवती ततोया
वल्लीलाकलहकुपितास्मिप्रियतमेसपत्नीवप्राचीदिशियमतिरक्तावदहसा ८ तूलाध्यवन्नी
रसकाष्टताडनशतंत्वलाध्यः प्रवंशजातपङ्कौ नूलाध्यतर मुपर्दू निचयः नूलाध्यो
तिदाहोनलैः पत्नकन्नाकुचपार्श्ववाञ्जलतिकाहिंडोललीलासुखंलब्धंकुंभवरप्रयञ्चाहिसुखेदुः
वैर्विनालभ्यते ९ किंकिंचन्नेसुपोन्यतुम्बासिवलात्रिलंजलज्ञानतेवत्क्रांतेस्पष्टसुंवसुंचराप
येः किंदूर्तेनिर्वसेविन्नाऽहंखलुरात्रिजागरतयातामेवयाहिप्रियांनिर्माल्योज्झितपुष्प
दामनिकरेकाषट्पदानांरतिः १० दाक्षिण्येनगतःसमेगृहपतिर्वार्ताऽपिनश्यतेमातस्तज्जन
नीप्रसूततनयाजामात्रगेहंगता बालाहंनवयौवनानिशिकथंस्यातव्यमेकाकिनीसायं २

४ न्ततः भयतनोरुत्किमत्रचित्रम् २२ यद्दिकथमपिदैवाद्दुर्गमार्गेचलित्वाविदलतितनु
मध्याक्षीयतेनौनदोषः दृष्टुनिविडकुचाभ्यांवर्त्मपश्यपान्थमारांकथापितमिवनेत्रेकरणेन
लेभयाते २३ कोपस्त्वयाहृदिकृतोयदिपङ्कजाक्षिसो ऽस्तुप्रियस्तवकिमत्रविधेयमन्य
मृवे॰दृवे॰= मत आश्लेषमर्पयमदर्पितपूर्व ... पितस्वमधरंत्व २४ इतिका स॰४४
लिदासकृतःशृंगारतिलकः समाप्तः ॥ नोरूबारतिमंदिरेवरतनुबालोनमेवल्ल
भो॥ एतेनेऋणुकारणंनवसखेवक्ष्याम्यजानंतुयंमांदृष्टानवयौवनांराशि
मुखीकंदर्पदर्पापहा मुक्तादेसगुरुःप्रियेणसहसापश्चात्कृतःसंगमः॥१॥ब
कस्तूरीतिलकंभालेबालेमाकुरुमाकुरु राकाशशांकमाशंक्यराहुरिच्छतितेमुखं २९ स
रोनारोपितः कंठेमयाविश्लेषभीरुणाइदानीमंतरेजाताः पर्वताः सरितः द्रुमाः ३

-11

1

22

सर्वहानानंतरं   स्व   कल्प

उ. ॐ गणपतये नमः उपनयनाभिधप्रारंभः तत्र शुद्धसमये रविगुरुचन्द्रतारादिशुद्धौ गर्भाष्टमेऽष्टमे वर्षे वा अनुकूले
१ षोडशसंवत्सरांतं रे ब्रह्मवर्चसकामं पंचमे उत्तरायणे आपूर्य्यमाणपक्षेऽनध्यायषष्ठीरिक्तातिरिक्ततिथौ
ते रविचंद्रबुधशुक्रगुर्वान्यतमवारे मध्याह्नादर्वाक् कुमारपित्राभ्युदयिके कृते तेनैवाचार्य्येणैव कृते द
यि ब्राह्मणान्माणवकं भोजयित्वा सशिखकृतक्षौरं स्नानानंतरं यथाशक्त्यलंकृतं कृत्वा बहिःशालायां तु षट्कश
शर्करादिरहितायां शुद्धपरिष्कृतभूमावाचार्योऽग्निस्थापनं कुर्यात् तत्र हस्तमात्रपरिमितचतुरस्रकुशा
करणकभस्मतो समूहनानंतरं गोमयोदकेनोपलिप्य स्रुवमूलेन प्रागग्रप्रादेशमात्रमुत्तरोत्तरक्रमेण त्रिरु न
२६८ ल्लिख्य उल्लेखनक्रमेणाऽनामिकांगुष्ठाभ्यामुद्धृत्य जलेनाभ्युक्ष्य नवीनकांस्यपात्रेणाग्निमादाय स्वाभिमुखं निद
ध्यात् ततः कुमारमाचार्य्यो शिष्यद्वाराऽग्नेः पश्चाद्दक्षिणपार्श्वे स्थापयति ततः कुमारं बद्धांजलिं संबो
धयति ब्रह्मचर्य्यमागामिति ब्रूहि इति प्रेषानंतरं ॐ ब्रह्मचर्य्यमागामिति कुमारः आह ॐ ब्रह्मच
र्य्यसानीति ब्रूहि इति आचार्येणोक्ते ॐ ब्रह्मचर्य्यसानीति कुमार आह अथ माणवकमाचार्य्यो वा
सः परिधापयति तत्र आचार्यपठनीयो मन्त्रः ॐ येनेन्द्राय बृहस्पतिर्वासः पर्यदधादमृतं तेन त्वा परि १

ॐ येनेन्द्राय इत्यस्य गिरा ऋषिः बृहस्पतिर्देवता वासः परिधापने विनियोगः
[illegible] छंदः

२ 3

२ पूरयति ॐ आपो हि ष्ठा मयोभुवस्तान ऊर्ज्जे दधातन महे रणाय चक्षसे यो वः शिवतमो रसस्तस्य भाजयते
ह नः उशतीरिव मातरः तस्मा अरंगमाम वो यस्य क्षयाय जिन्वथ आपो जनयथा च नः इति तिसृभिः ततः
सूर्य्यमुदीक्षस्वेत्याचार्यप्रेरणानन्तरं ॐ तच्चक्षुर्देवहितं पुरस्ताच्छुक्रमुच्चरत् पश्येम शरदः शतं जी
वेम शरदः शतं शृणुयाम शरदः शतं प्रब्रवाम शरदः शतमदीनाः स्याम शरदः शतं भूयश्च श
रदः शतात् इत्यनेनादित्यं पश्यति अथ कुमारस्य दक्षिणांसमस्य हृदयं दक्षिणहस्तेन स्पृशत्या
चार्यः ॐ मम व्रते ते हृदयं दधामि मम चित्तमनुचित्तं तेऽस्तु मम वाचमेकमना जुषस्व बृहस्प
तिष्ट्वा नियुनक्तु मह्यमिति मन्त्रेण ततः कुमारस्य दक्षिणहस्तं गृहीत्वा तं पृच्छति को नामासीति सो
अमुकशर्माहं भो इति कुमार आह कस्य ब्रह्मचार्यसीत्याचार्यः भवतः इति कुमार आह पु
ब्रह्मचार्य्य सो× ३ नराचार्यो भाषते ॐ इन्द्रस्याग्निराचार्यस्तवाहमाचार्यस्तवाहमाचार्योऽमुकशर्मणः अयमा
णवकं ब्रह्मांजलिं पूर्वादि दिक्चतुष्टयं दक्षिणमुपस्थानं कारयति तत्राचार्यस्य मन्त्रपाठः ॐ प्रजा
पतये त्वा परिदधामि इति प्राच्यां ॐ देवाय त्वा सवित्रे परिदधामीति दक्षिणस्यां ॐ अद्भ्यस्त्वौष २

ब्रह्मा
इयं दुरुक्तमिति वामदेव ऋषिस्त्रिष्टुप् प्रजापतिर्देवता त्रिष्टुप् छंदः मेखलापरि
धाने विनियोगः॥

दधाम्यसौ दीर्घायुत्वाय बलाय वर्चसे ततो माणवकस्य द्विराचमनं अथ माणवकस्य वेष्टनत्रयेण प्रवरग्रन्थि
युतां कृत्वा मेखलामाचार्यो बध्नाति तत्र माणवकपठनीयो मंत्रः ॐ इयं दुरुक्तं परिबाधमाना वर्णं पवि
त्रं पुनती म आगात् प्राणापानाभ्यां बलमादधाना स्वसा देवी सुभगा मेखलेयं ॐ युवा सुवासाः परिवी
त आगात् स उ श्रेयान् भवति जायमानः तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः इति वार
ततः आचाराद्यज्ञोपवीतसहितभांडाष्टकं ब्राह्मणेभ्यो दत्वा ॐ यज्ञोपवीतमिति परमेष्ठि ऋषिर्लिंगोर
क्तो देवता त्रिष्टुप् छंदः उपवीतपरिधाने विनियोगः अथ यज्ञोपवीतपरिधानं ततो यज्ञोपवीतं पर
रिदधाति माणवकः तत्राचार्येण पठनीयो मंत्रः ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्ता
त् आयुष्यमग्र्यं प्रतिमुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः इति मंत्रेण ततः येणाय मजिनं तूष्णीं परि
धत्ते ततो माणवककेशपरिमितपलाशदंडमाचार्यस्तूष्णीं तस्मै प्रयच्छति तं च ॐ यो मे
दंडः परापतद्वैहायसोऽधि भूम्यां तमहं पुनरादद आयुषे ब्रह्मणे ब्रह्मवर्चसाय इति मंत्रेण मा
णवको गृह्णाति ततः आचार्यो वारिणा स्वमंजलीं पूरयित्वा कुमारस्याञ्जलिं तेनैवाञ्जलिना

पालाशदंडं ब्राह्मणस्य वैल्वो राजन्यस्य औदुंबरो वैश्यस्य वैणवं सर्वेषां॥

द्वयोर्मध्ये मंत्रैकस्य पाठः॥ ततो यज्ञोपवीतं परिदधाति माणवकः॥

ॐ यो मे दंड इति प्रजापति ऋषिर्दंडो देवता यजुर्दंडग्रहणे विनियोगः॥

३

३ स्त्रः स्रुवः आज्यं षट्पंचाशदुत्तरद्वयां यम्मुष्टिप्रमाणद्वयावच्छिन्नमतंडुलपूर्णपात्रं पवित्रछेदनकुशानां 5
पूर्वपूर्वदिशि क्रमेणासादनीयं ततः पवित्रछेदनकुशैः पवित्रे छित्वा सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपा
त्रे निधायानामिकांगुष्ठाभ्यां पवित्रे उत्तराग्रे गृहीत्वा त्रीरुत्पूय प्रोक्षणीपात्रं वामकरे कृत्वानामिकांगु
ष्ठाभ्यां गृहीतपवित्राभ्यां तज्जलं किंचित् त्रिरुत्क्षिप्य प्रणीतोदकेन प्रोक्षणीं त्रिरभिषिच्य प्रोक्षणीजलेना
सादितवस्तुसेचनं कृत्वाऽग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् आज्यस्थाल्यामाज्यं निरूप्याधि
श्रयणं ततः कुशं प्रज्वाल्याज्योपरि प्रदक्षिणं भ्रामयित्वा वह्नौ तत्क्षिप्य स्रुवं त्रिः परितप्य संमार्जनकु
कुशानामग्रैरन्तरतो मूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिः परितप्य दक्षिणतो नि
दध्यात् ततः आज्यमग्नेरवतार्य त्रिः प्रोक्षणीवदुत्पूयावेक्ष्य सत्यपद्रव्ये तन्निरसनं कृत्वा पुनः प्रोक्षणी
वदुत्पूय ततः उत्थायोपयमनकुशान्वामहस्ते कृत्वा प्रजापतिं मनसा ध्यात्वा तूष्णीं घृताक्ताः समि
धस्तिस्रः प्रक्षिपेत् उपविश्य सपवित्रप्रोक्षण्युदकेन प्रदक्षिणक्रमेणाग्निं पर्युक्ष्य प्रणीतापात्रे पवि ३
त्रे निधाय पातितदक्षिणजानुः ब्रह्मणान्वारब्धः समिद्धतमेऽग्नौ स्रुवेणाज्याहुतीर्जुहोति तत्र तत्र

धिभ्यः परिदधामीति प्रतीच्यां ओं द्यावापृथिवीभ्यां त्वां परिदधामीत्युदीच्यां ओं विश्वेभ्यो त्वा देवेभ्यः परिदधा
मीत्यधः ओं सर्वेभ्यस्त्वा भूतेभ्यः परिदधामीत्युपरिष्टात् ततोऽग्निं प्रदक्षिणीकृत्याचार्यदक्षिणादिशि उपविशति मा
णवकः ततः पुष्पचंदनताम्बूलवासांस्यादाय ततः ओं अद्य कर्त्तव्योपनयनहोमकर्मणि कृताकृ
तावेक्षणरूपब्रह्मकर्मकर्त्तुममुकगोत्रममुकशर्म्माणं ब्राह्मणमेभिः पुष्पचंदनताम्बूलवासोभि
र्ब्रह्मत्वेन त्वामहं वृणे इति ब्राह्मणं वृणुयात् ओं वृतोऽस्मीति प्रतिवचनं यथाविहितं कर्म कुर्वीत्या
चार्येणोक्ते ओं करवाणीति प्रतिवचनानंतरं अग्नेर्दक्षिणतः शुद्धमासनं दत्वा तदुपरि प्रागग्रान्कुशानास्तीर्या
ग्निं प्रदक्षिणं कारयित्वाऽस्मिन्कर्मणि त्वं मे ब्रह्मा भवेत्यभिधाय ओं भवानीति तेनोक्ते तदुपरि ब्राह्मणमुदङ्मु नेः
खमुपवेश्य ततः प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य्य कुशैराच्छाद्य ब्रह्मणो मुखमवलोक्याग्नेरुत्तरतः
कुशोपरि निदध्यात् ततः परिस्तरणं बर्हिषश्चतुर्थभागमादायाग्नेयादीशानांतं ब्रह्मणोऽग्निपर्यंतं नैरित्या
द्वायव्यंतं अग्नितः प्रणीतापर्यंतं ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेदनार्थं कुशत्रयं पवित्रार्थं साग्र
मनंतर्गर्भं कुशपत्रद्वयं प्रोक्षणीपात्रमाज्यस्थालि संमार्जनार्थं कुशत्रयं उपयमनकुशाः समिधस्तिस्र

उ

४ कृते स्वाहा इदमग्नये स्विष्टकृते इति स्विष्टकृत् ततः संस्रवप्राशनं आचम्य ततो ब्रह्मणे दक्षिणा ओं अद्य
तस्मिन्नुपनयनहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्रतिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतममुकगोत्रा
यामुकशर्मणे ब्राह्मणाय दक्षिणां तुभ्यमहं संप्रददे इति दक्षिणां दद्यात् ओं स्वस्तीति प्रतिवचनं ततो ब्रह्मग्रन्थि
विमोकः ओं सुमित्रिया न आप ओषधयः सन्त्विति पवित्राभ्यां जलमानीय तेन शिरः संमृज्य ओं दुर्मित्रियास्त
स्मै सन्तु योस्मान्द्वेष्टि यं च वयं द्विष्मः इत्यैशान्यां प्रणीतान्युब्जीकरणं ततः आस्तरणक्रमेण बर्हिरुत्था
प्य घृतेनाभिघार्य हस्तेनैव जुहुयात् ओं देवा गातुविदो गातुं वित्त्वा गातुमित मनसस्पत इमं देव यज्ञं स्वा
हा वाते धाः स्वाहा इति बर्हिर्होमः आचार्य्यः कुमारस्यानुशासनं करोति ओं ब्रह्मचार्यसीत्याचार्य्यः ओं
असानीति कुमारः आह ओं आपोऽशानेत्याचार्य्यः ओं अश्नानीति कुमारः कर्म कुर्वित्याचार्य्यः ओं
करवाणीति कुमारः मा दिवा स्वाप्सीरित्याचार्य्यः ओं न स्वपामीति कुमारः ओं वाचं यच्छेत्याचार्यः ओं यच्छामी
ति कुमारः ओं समिधमाधेहीत्याचार्य्यः ओं आदधानीति कुमारः ओं आपोऽशानेत्याचार्यः ओं अशा
नीति कुमारः अथाग्नेरुत्तरतः प्रत्यङ्मुखायोपविष्टायाचार्यचरणोपसंग्रहणपूर्वकमुपसन्नाचा ४

दाहृत्यानैरृत्यां स्रुवावस्थितघृतशेषस्य प्रोक्षणीपात्रे प्रक्षेपः ओं प्रजापतये स्वाहा इदं प्रजापतये इति मनसा ओं इ 8
न्द्राय स्वाहा इदमिन्द्राय इत्याघारौ ओं अग्नये स्वाहा इदमग्नये ओं सोमाय स्वाहा इदं सोमाय इत्याज्यभागौ
ओं भूः स्वाहा इदं भूः ओं भुवः स्वाहा इदं भुवः ओं स्वः स्वाहा इदं स्वः एता महाव्याहृतयः ओं त्वन्नो अग्ने वरुण
स्य विद्वान्देवस्य हेडो अव यासिसीष्ठाः यजिष्ठो वह्नितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत् स्वा
हा इदमग्निवरुणाभ्यां ओं स त्वन्नो अग्ने ऽवमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ अव यक्ष्व नो वरुणं रर
णो वीहि मृडीकं सुहवो न एधि स्वाहा इदमग्निवरुणाभ्यां ओं अयाश्चाग्नेऽस्यनभिशस्तिपाश्च सत्वमि
त्वमया असि अया नो यज्ञं वहास्यया नो धेहि भेषजं स्वाहा इदमग्नये ओं ये ते शतं वरुण ये सहस्रं य
ज्ञियाः पाशा वितता महान्तः तेभिर्नो अद्य सवितोत विष्णुर्विश्वे मुञ्चन्तु मरुतः स्वर्काः स्वाहा इ
दं वरुणाय सवित्रे विष्णवे विश्वेभ्यो देवेभ्यो मरुद्भ्यः स्वर्केभ्यः ओं उदुत्तमं वरुण पाशमस्मदवाधमं वि म
ध्यमं श्रथाय अथा वयमादित्य व्रते तवानागसो अदितये स्याम स्वाहा इदं वरुणाय एताः
सर्वाः प्रायश्चित्तसंज्ञकाः ओं प्रजापतये स्वाहा इदं प्रजापतये इति मनसा प्राजापत्यं ओं अग्नये स्विष्ट

उ

५ मेपाहि ॐआयुर्दाअग्नेस्यायुर्मेदेहि ॐवर्चोदाअग्नेसिवर्चोमेदेहि ॐअग्नेयन्मेतन्वाऊनंतन्मआपृण ॐमे
धांमेदेवःसविताआदधातु ॐमेधांमेदेवीसरस्वतीआदधातु ॐमेधांमेअश्विनौदेवावाधत्तांपुष्करस्र
जौ ततःसर्वगात्रेषुदक्षिणपाणिनास्पर्शः अत्रप्रत्येकंमंत्र ॐअंगानिचमआप्यायंतां इतिसर्वगात्रा ९
लंभने ॐवाक्चमआप्यायतामितिमुखालंभने ॐप्राणश्चमआप्यायतामितिनासिकयोः ॐचक्षुश्च
मआप्यायतामितिचक्षुषो ॐश्रोत्रंचमआप्यायतामितिश्रोत्रे ॐयशोबलंचमआप्यायतामितिमंत्र
पाठमात्रं ततोदक्षिणकरानामिकाग्रगृहीतभस्मनाललाटेग्रीवायांदक्षिणबाहुमूलेहृदिचत्र्यायु
षंकुर्यात् तत्रयथासंख्येनमंत्रचतुष्टयं ॐत्र्यायुषंजमदग्नेः ॐकश्यपस्यत्र्यायुषं ॐयद्देवेषुत्र्या
युषं ॐतन्नोअस्तुत्र्यायुषं ततोव्यस्तपाणिभ्यांपृथिवीस्पर्शनंनमनंकुर्यात् तत्रप्रकारः ॐअमुकगो वादनं ५
हंअमुकप्रवरोहममुकशर्माहंभोवैश्वानरत्वांअभिवादये ततोनेनैवक्रमेणसंबोधनरूपेणमामेवाद्या
चार्यंतथैवाभिवादयेत् आयुष्मान्भवसौम्येइत्याचार्योब्रूयात्ततोभिक्षापात्रमादाय प्रथमंमातुः
सकाशात् ॐभवतिभिक्षांमेदेहि इतिप्रार्थनानंतरंतद्दत्तांचादायाचार्यायनिवेदयेत् तथैवमि

रामः ५

र्थ्यंसमीक्षमाणायाचार्य्यः स्वयमपिमपिसमीक्षितायास्मैनिवारितंशंखलुय्यादिशद्दइष्टांसकेगायत्रीमन्वाह तत्रप्रथमाहेतो
ओंभूर्भुवःस्वतत्सवितुर्वरेण्यंभर्गोदेवस्यधीमहिधियोयोनःप्रचोदयात् ओंपुनर्वारद्वयं अत्रतुसहपाठेविशेषः अभिमाणव य
कस्याचार्यदक्षिणादिशिअग्निपश्चिमोपविश्यघृताक्तस्रुक्कनिषिद्धेतरेंधनेनजुहुयात् ततः ओंअग्नेसुश्रवःसुश्रवसंमाकुरु
ओंयथात्वमग्नेसुश्रवःसुश्रवाअसि ओंएवंमांसुश्रवःसौश्रवसंकुरु ओंयथात्वमग्नेदेवानांयज्ञस्यनिधिपाअसि एवमहं
८ मनुष्याणांवेदस्यनिधिपोभूयासं ततःप्रदक्षिणमग्निंवारिणापर्युक्ष्यउत्थायप्रादेशमितांघृताक्तपलाशसमिधमा
पे दायं ओंअग्नयेसमिधमाहार्षंबृहतेजातवेदसे यथात्वमग्नेसमिधासमिध्यसएवमहमायुषामेधयावर्चे धा=
साप्रजयापशुभिर्ब्रह्मवर्चसेनसमिंधेजीवपुत्रोममाचार्योमेधाव्यहमसान्यनिराकरिष्णुर्यशस्वीतेजस्वीब्रह्म
वर्चस्यन्नादोभूयासंस्वाहा इतिमन्त्रेणजुहुयात् एवंसमिद्द्वितयंजुहुयात् उपविश्यघृताक्तस्रुक्कनिषिद्धेत
रेंधनेनपंचाहुतीर्जुहुयात् ओंअग्नेसुश्रवःसुश्रवसंमाकुरु ओंयथात्वमग्नेसुश्रवःसुश्रवाअसि ओंएवंमां
सुश्रवःसौश्रवसंकुरु ओंयथात्वमग्नेदेवानांयज्ञस्यनिधिपाअसि ओंएवमहंमनुष्याणांवेदस्यनिधिपो
भूयासं ततःप्रदक्षिणमग्निंपर्य्युक्ष्य तूष्णींपाणीप्रतप्यमुखंप्रतिमंत्रांतेवमृशति ओंतनूपाअग्नेसितनूं

उ॰न
६

ॐ

दाय ॐ अद्य कर्त्तव्यवेदारंभहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मकर्त्तुम् अमुकगोत्रम् अमुकशर्माणं ब्रा-
ह्मणमेभिः पुष्पचंदनताम्बूलवासोभिर्ब्रह्मत्वेन त्वामहं वृणे इति ब्राह्मणं वृणुयात् वृतोस्मीति प्रतिवचनं ॐ
यथाविहितं कर्म कुर्विति अभिधाय ॐ करवाणीति तेनोक्ते अग्नेर्दक्षिणतः शुद्धमासनं दत्त्वा तदुपरि प्रागग्रा-
न्कुशानास्तीर्याग्निप्रदक्षिणक्रमेण भ्रामयित्वा ॐ अस्मिन्कर्मणि त्वं मे ब्रह्मा भव ॐ भवानीति ते-
नोक्ते ब्राह्मणमुदङ्मुखं तत्रोपवेश्य प्रणीतापात्रं पुरतः कृत्वा वारिणा परिपूर्य कुशैराच्छाद्य ब्रह्मणो मु-
खमवलोक्याग्नेरुत्तरतः कुशोपरि निदध्यात् ततः परिस्तरणं बर्हिषश्चतुर्थभागमादायाग्नेयादीशानान्तं
ब्रह्मणोऽग्निपर्यन्तं नैरृत्याद्वायव्यान्तं अग्नितः प्रणीतापर्यन्तं ततोऽग्नेरुत्तरतः पश्चिमदिशि पवित्रच्छेद-
र्थं कुशत्रयं पवित्रकरणार्थं साग्रमनन्तर्गर्भं कुशपत्रद्वयं प्रोक्षणीपात्रमाज्यस्थाली संमार्जनकुशाः
उपयमनकुशाः समिधस्तिस्रः स्रुवः आज्यं पूर्णपात्रं पवित्रच्छेदनकुशानां पूर्वपूर्वदिशि दिशि क्रमेणा-
सादनीयं ततः पवित्रच्छेदनकुशैः पवित्रे छित्त्वा सपवित्रकरेण प्रणीतोदकं त्रिः प्रोक्षणीपात्रे निधाय
द्वाभ्यामनामिकाङ्गुष्ठाभ्यामुत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवनं ततः प्रोक्षणीपात्रं वामहस्ते कृत्वा दक्षि-
णहस्तानामिकाङ्गुष्ठाभ्यां त्रिरुदिङ्गनं ततः प्रणीतोदकेन प्रोक्षणीपात्रमभ्युक्ष्य प्रोक्षणीजलेनासा-
दितवस्तुसेचनमग्निप्रणीतयोर्मध्ये प्रोक्षणीपात्रं निदध्यात् ततः आज्यस्थाल्यामाज्यनिर्वापः अधि-
श्रयणं ततः कुशं प्रज्वाल्याज्यस्याग्नेश्चोपरि प्रदक्षिणं भ्रामयित्वा वाग्नौ तत्प्रक्षेपः ततस्त्रिः स्रुवप्रतप-
नं संमार्जनकुशानामग्रैरन्तरतो मूलैर्बाह्यतः स्रुवं संमृज्य प्रणीतोदकेनाभ्युक्ष्य पुनस्त्रिः प्रतप्य ६

ततः
क्षांतरं याचेत् आचार्येण मुक्तेत्यनुज्ञातो भिक्षां स्वीकुर्यात् ततः फलपुष्पघृतयुक्तेन ब्रह्मचारिदक्षिण
करस्पृष्टेनाचार्यः पूर्णाहुतिं दद्यात् तत्र मंत्रः ॐ मूर्द्धानं दिवो अरतिं पृथिव्या वैश्वानरमृत आजातम
ग्निं कविं सम्राजमतिथिं जनानामासन्ना पात्रं जनयंत देवाः स्वाहा इदमग्नये ततः स्रुवेण भस्मानीय
